(४४२)

त्वं ह्य॒ अग्ने प्रथ॒मो म॒नोता॒स्या धि॒यो अभ॑वो दस्म॒ होता॑ ।
त्वं सीं॑ वृषन्न् अकृणोर् दु॒ष्टरी॑तु॒ सहो॒ विश्व॑स्मै॒ सह॑से॒ सह॑ध्यै ॥ ६ ००१ ०१
अधा॒ होता॒ न्य् असीदो॒ यजी॑यान् इ॒ळस् प॒द इ॒षयन्न् ईड्यः॒ सन् ।
तं त्वा॒ नरः॑ प्रथ॒मं दे॑व॒यन्तो॑ म॒हो रा॒ये चि॒तय॑न्तो॒ अनु॑ ग्मन् ॥ ६ ००१ ०२
वृ॒तेव॒ यन्त॑म् ब॒हुभि॑र् वस॒व्याइ॒स् त्वे र॒यिं जा॑गृ॒वांसो॒ अनु॑ ग्मन् ।
रुश॑न्तम् अ॒ग्निं द॑र्श॒तम् बृ॒हन्तं॑ व॒पाव॑न्तं वि॒श्वहा॑ दीदि॒वांस॑म् ॥ ६ ००१ ०३
प॒दं दे॒वस्य॒ नम॑सा॒ व्यन्तः॑ श्रव॒स्यवः॒ श्रव॑ आप॒न्न् अमृ॑क्तम् ।
नामा॑नि चिद् दधिरे य॒ज्ञिया॑नि भ॒द्रायां॑ ते रणयन्त॒ संदृ॑ष्टौ ॥ ६ ००१ ०४
त्वां व॑र्धन्ति क्षि॒तयः॑ पृथि॒व्यां त्वां राय॑ उ॒भया॑सो॒ जना॑नाम् ।
त्वं त्रा॒ता त॑रणे॒ चेत्यो॑ भूः पि॒ता मा॒ता सद॒म् इन् मानु॑षाणाम् ॥ ६ ००१ ०५
स॒प॒र्येण्यः॒ स प्रि॒यो वि॒क्ष्व् अ१॑ग्निर् होता॑ म॒न्द्रो नि ष॑सादा॒ यजी॑यान् ।
तं त्वा॑ व॒यं दम॒ आ दी॑दि॒वांस॒म् उप॑ ज्ञु॒बाधो॒ नम॑सा सदेम ॥ ६ ००१ ०६
तं त्वा॑ व॒यं सु॒ध्यो॒३॒॑ नव्य॑म् अग्ने सुम्ना॒यव॑ ईमहे देव॒यन्तः॑ ।
त्वं विशो॑ अनयो॒ दीद्या॑नो दि॒वो अ॑ग्ने बृह॒ता रो॑च॒नेन॑ ॥ ६ ००१ ०७
वि॒शां क॒विं वि॒श्पतिं॒ शश्व॑तीनां नि॒तोश॑नं वृष॒भं च॑र्षणी॒नाम् ।
प्रेती॑षणिम् इ॒षय॑न्तम् पाव॒कं राज॑न्तम् अ॒ग्निं य॑ज॒तं र॑यी॒णाम् ॥ ६ ००१ ०८
सो अ॑ग्न ईजे शश॒मे च॒ मर्तो॒ यस् त॒ आन॑ट् स॒मिधा॑ ह॒व्यदा॑तिम् ।
य आहु॑तिम् परि॒ वेदा॒ नमो॑भि॒र् विश्वेत् स वा॒मा द॑धते॒ त्वोतः॑ ॥ ६ ००१ ०९
अ॒स्मा उ॑ ते॒ महि॑ म॒हे वि॑धेम॒ नमो॑भिर् अग्ने स॒मिधो॒त ह॒व्यैः ।
वेदी॑ सूनो सहसो गी॒र्भिर् उ॒क्थैर् आ ते॑ भ॒द्रायां॑ सु॒मतौ॑ य॑तेम ॥ ६ ००१ १०
आ यस् त॒तन्थ॒ रोद॑सी॒ वि भा॒सा श्रवो॑भिश् च श्रव॒स्य१॒स् तरु॑त्रः ।
बृ॒हद्भि॑र् वाजै॒ स्थवि॑रेभिर् अ॒स्मे रे॒वद्भि॑र् अग्ने वित॒रं वि भा॑हि ॥ ६ ००१ ११
नृ॒वद् व॑सो॒ सद॒म् इद् धे॑ह्य अ॒स्मे भूरि॑ तो॒काय॒ तन॑याय प॒श्वः ।
पू॒र्वीर् इषो॑ बृह॒तीर् आ॒रे-अ॑घा अ॒स्मे भ॒द्रा सौ॑श्रव॒सानि॑ सन्तु ॥ ६ ००१ १२
पु॒रूण्य् अ॑ग्ने पु॒रुधा॑ त्वा॒या वसू॑नि राजन् व॒सुता॑ ते अश्याम् ।
पु॒रूणि॒ हि त्वे पु॑रुवा॒र सन्त्य् अग्ने॒ वसु॑ वि॒धते॒ राज॑नि॒ त्वे ॥ ६ ००१ १३

(४४३)

त्वं हि क्षैत॑व॒द् यशो ऽ॑ग्ने मि॒त्रो न पत्य॑से ।

त्वं वि॑चर्षणे॒ श्रवो॒ वसो॑ पु॒ष्टिं न पु॑ष्यसि ॥ ६ ००२ ०१

त्वां हि ष्मा॑ चर्ष॒णयो॑ य॒ज्ञेभि॑र् गी॒र्भिर् ईळ॑ते ।

त्वां वा॒जी या॑त्य् अवृ॒को र॑ज॒स्तू॒र् वि॒श्वच॑र्षणिः ॥ ६ ००२ ०२

स॒जोष॑स् त्वा दि॒वो नरो॑ य॒ज्ञस्य॑ के॒तुम् इन्ध॑ते ।

यद् ध॒ स्य मानु॑षो॒ जनः॑ सुम्ना॒युर् जु॒ह्वे अ॑ध्व॒रे ॥ ६ ००२ ०३

ऋध॒द् यस् ते॑ सु॒दान॑वे धि॒या मर्तः॑ श॒शम॑ते ।

ऊ॒ती ष बृ॑ह॒तो दि॒वो द्वि॒षो अंहो॒ न त॑रति ॥ ६ ००२ ०४

स॒मिधा॒ यस् त॒ आहु॑तिं॒ निशि॑ति॒म् मर्त्यो॑ नश॑त् ।

व॒याव॑न्तं॒ स पु॑ष्यति॒ क्षय॑म् अग्ने श॒तायु॑षम् ॥ ६ ००२ ०५

त्वे॒षस् ते॑ धू॒म ऋ॑ण्वति दि॒वि षञ् छु॒क्र आत॑तः ।

सूरो॒ न हि द्यु॒ता त्वं कृ॒पा पा॑वक॒ रोच॑से ॥ ६ ००२ ०६

अधा॒ हि वि॒क्ष्व् ईड्यो ऽ॑सि प्रि॒यो नो॒ अति॑थिः ।

र॒ण्वः पु॒रीव॒ जूर्यः॑ सू॒नुर् न त्र॑य॒याय्यः॑ ॥ ६ ००२ ०७

क्रत्वा॒ हि द्रोणे॑ अ॒ज्यसे ऽ॑ग्ने वा॒जी न कृत्व्यः॑ ।

परि॑ज्मेव स्व॒धा गयो ऽ॑त्यो॒ न ह्वा॒र्यः शिशुः॑ ॥ ६ ००२ ०८

त्वं त्या चि॒द् अच्यु॒ताग्ने॑ प॒शुर् न यव॑से ।

धामा॑ ह॒ यत् ते॑ अज॒र वना॑ वृ॒श्चन्ति॒ शिक्व॑सः ॥ ६ ००२ ०९

वेषि॒ ह्य॒ध्वरीय॒ताम् अग्ने॒ होता॒ दमे॑ वि॒शाम् ।

स॒मृधो॑ विश्पते कृणु जु॒षस्व॑ ह॒व्यम् अ॑ङ्गिरः ॥ ६ ००२ १०

अच्छा॑ नो मित्रमहो देव दे॒वान् अग्ने॒ वोचः॑ सु॒मतिं॑ रोद॑स्योः ।

वी॒हि स्व॒स्तिं सु॑क्षि॒तिं दि॒वो नॄन् द्वि॒षो अंहां॑सि दु॒रिता त॑रेम॒ ता त॑रेम॒ तवाव॑सा तरेम
॥ ६ ००२ ११

(४४४)

अग्ने स क्षेषद् ऋतपा ऋतेजा उरु ज्योतिर् नशते देवयुष् टे ।
यं त्वम् मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तम् अंहः ॥ ६ ००३ ०१
ईजे यज्ञेभिः शशमे शमीभिर् ऋधद्वारायाग्नये ददाश ।
एवा चन तं यशसाम् अजुष्टिर् नांहो मर्तं नशते न प्रदृप्तिः ॥ ६ ००३ ०२
सूरो न यस्य दृशतिर् अरेपा भीमा यद् एति शुचतस् त आ धीः ।
हेषस्वतः शुरुधो नायम् अक्तोः कुत्रा चिद् रण्वो वसतिर् वनेजाः ॥ ६ ००३ ०३
तिग्मं चिद् एम महि वर्पो अस्य भसद् अश्वो न यमसान आसा ।
विजेहमानः परशुर् न जिह्वां द्रविर् न द्रावयति दारु धक्षत् ॥ ६ ००३ ०४
स इद् अस्तेव प्रति धाद् असिष्यञ् छिशीत तेजो ऽयसो न धाराम् ।
चित्रध्रजतिर् अरतिर् यो अक्तोर् वेर् न द्रुषद्वा रघुपत्मजंहाः ॥ ६ ००३ ०५
स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।
नक्तं य ईम् अरुषो यो दिवा नॄन् अमर्त्यो अरुषो यो दिवा नॄन् ॥ ६ ००३ ०६
दिवो न यस्य विधतो नवीनोद् वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्न् आ रोदसी वसुना दं सुपत्नी ॥ ६ ००३ ०७
धायोभिर् वा यो युज्येभिर् अर्कैर् विद्युन् न दविद्योत् स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर् न त्वेषो रभसानो अद्यौत् ॥ ६ ००३ ०८

(४४५)
यथा होतर् मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानान् उशन्न् अग्न उशतो यक्षि देवान् ॥ ६ ००४ ०१
स नो विभावा चक्षणिर् न वस्तोर् अग्निर् वन्दारु वेद्यश् चनो धात् ।
विश्वायुर् यो अमृतो मर्त्येषूषर्भुद् भूद् अतिथिर् जातवेदाः ॥ ६ ००४ ०२
द्यावो न यस्य पनयन्त्य् अभ्वम् भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्य् अजरः पावको ऽश्नस्य चिच् छिश्नथत् पूर्व्याणि ॥ ६ ००४ ०३
वद्मा हि सूनो अस्य् अद्मसद्वा चक्रे अग्निर् जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेर् अवृके क्षेष्य् अन्तः ॥ ६ ००४ ०४
नितिक्ति यो वारणम् अन्नम् अत्ति वायुर् न राष्ट्र्य् अत्य् एत्य् अक्तून् ।

तुर्याम यस् त आदिशाम् अरातीर् अत्यो न ह्रुतः पततः परिह्रुत् ॥ ६ ००४ ०५
आ सूर्यो न भानुमद्भिर् अर्कैर् अग्ने ततन्थ रोदसी वि भासा ।
चित्रो नयत् परि तमांस्य् अक्तः शोचिषा पत्मन्न् औशिजो न दीयन् ॥ ६ ००४ ०६
त्वां हि मन्द्रतमम् अर्कशोकैर् ववृमहे महि नः श्रोष्य् अग्ने ।
इन्द्रं न त्वा शवसा देवता वायुम् पृणन्ति राधसा नृतमाः ॥ ६ ००४ ०७
नू नो अग्ने ऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्य् अंहः ।
ता सूरिभ्यो गृणते रासि सुम्नम् मदेम शतहिमाः सुवीराः ॥ ६ ००४ ०८

(४४६)
हुवे वः सूनुं सहसो युवानम् अद्रोघवाचम् मतिभिर् यविष्ठम् ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ॥ ६ ००५ ०१
त्वे वसूनि पुर्वणीक होतर् दोषा वस्तोर् एरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन् सं सौभगानि दधिरे पावके ॥ ६ ००५ ०२
त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीर् अभवो वार्याणाम् ।
अत इनोषि विधते चिकित्वो व्य् आनुषग् जातवेदो वसूनि ॥ ६ ००५ ०३
यो नः सनुत्यो अभिदासद् अग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तम् अजरेभिर् वृषभिस् तव स्वैस् तपा तपिष्ठ तपसा तपस्वान् ॥ ६ ००५ ०४
यस् ते यज्ञेन समिधा य उक्थैर् अर्केभिः सूनो सहसो ददाशत् ।
स मर्त्येष्व् अमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ॥ ६ ००५ ०५
स तत् कृधीषितस् तूयम् अग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
यच् छस्यसे द्युभिर् अक्तो वचोभिस् तज् जुषस्व जरितुर् घोषि मन्म ॥ ६ ००५ ०६
अश्याम तं कामम् अग्ने तवोती अश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजम् अभि वाजयन्तो ऽश्याम द्युम्नम् अजराजरं ते ॥ ६ ००५ ०७

(४४७)
प्र नव्यसा सहसः सूनुम् अच्छा यज्ञेन गातुम् अव इच्छमानः ।

वृ॒श्चद्व॑नं कृ॒ष्णया॑मं॒ रुश॑न्तं वी॒ती होता॑रं दि॒व्यं जि॑गाति ॥ ६ ००६ ०१
स श्वि॑ता॒नस् त॑न्य॒तू रो॑चन॒स्था अ॒जरे॑भि॒र् नान॑दद्भि॒र् यवि॑ष्ठः ।
यः पा॑व॒कः पु॑रु॒तमः॑ पु॒रूणि॑ पृ॒थून्य् अ॒ग्निर् अ॑नु॒याति॒ भर्व॑न् ॥ ६ ००६ ०२
वि ते॒ विष्व॒ग् वात॑जूतासो अग्ने॒ भामा॑सः शुचे॒ शुच॑यश् चरन्ति ।
तु॒वि॒म्र॒क्षासो॑ दि॒व्या नव॑ग्वा॒ वना॑ वनन्ति धृष॒ता रु॒जन्तः॑ ॥ ६ ००६ ०३
ये ते॑ शु॒क्रासः॒ शुच॑यः शुचिष्मः॒ क्षां वप॑न्ति॒ विषि॑तासो॒ अश्वाः॑ ।
अध॑ भ्र॒मस् त॑ उर्वि॒या वि भा॑ति या॒तय॑मानो॒ अधि॒ सानु॒ पृश्नेः॑ ॥ ६ ००६ ०४
अध॑ जि॒ह्वा पा॑पतीति॒ प्र वृष्णो॑ गोषु॒युधो॒ नाशनिः॑ सृजा॒ना ।
शूर॑स्येव॒ प्रसि॑तिः क्षा॒तिर् अ॒ग्नेर् दु॒र्वर्तु॑र् भी॒मो दय॑ते॒ वना॑नि ॥ ६ ००६ ०५
आ भा॒नुना॒ पार्थि॑वानि॒ ज्रयां॑सि म॒हस् तो॒दस्य॑ धृष॒ता त॑तन्थ ।
स बा॑ध॒स्वाप॑ भ॒या सहो॑भि॒ स्पृधो॑ वनु॒ष्यन् व॒नुषो॒ नि जू॑र्व ॥ ६ ००६ ०६
स चि॑त्र चि॒त्रं चि॒तय॑न्तम् अ॒स्मे चित्र॑क्षत्र चि॒त्रत॑मं वयो॒धाम् ।
च॒न्द्रं र॒यिम् पु॑रु॒वीर॑म् बृ॒हन्तं॒ चन्द्र॑ च॒न्द्राभि॑र् गृण॒ते यु॑वस्व ॥ ६ ००६ ०७

(४४८)
मू॒र्धानं॑ दि॒वो अ॑र॒तिम् पृ॑थि॒व्या वै॑श्वान॒रम् ऋ॒त आ जा॒तम् अ॒ग्निम् ।
क॒विं स॒म्राज॒म् अति॑थिं॒ जना॑नाम् आ॒सन्न् आ पात्रं॑ जनयन्त दे॒वाः ॥ ६ ००७ ०१
नाभिं॑ य॒ज्ञानां॒ सद॑नं रयी॒णाम् म॒हाम् आ॑हा॒वम् अ॒भि सं न॑वन्त ।
वै॒श्वा॒न॒रं र॒थ्यम् अध्व॒राणां॑ य॒ज्ञस्य॑ के॒तुं ज॑नयन्त दे॒वाः ॥ ६ ००७ ०२
त्वद् विप्रो॑ जायते वा॒ज्य् अग्ने॒ त्वद् वी॒रासो॑ अभिमाति॒षाहः॑ ।
वैश्वा॑नर॒ त्वम् अ॒स्मासु॑ धेहि॒ वसू॑नि राजन् स्पृह॒याय्या॑णि ॥ ६ ००७ ०३
त्वां विश्वे॑ अमृत॒ जाय॑मानं॒ शिशुं॒ न दे॒वा अ॒भि सं न॑वन्ते ।
तव॒ क्रतु॑भिर् अमृत॒त्वम् आ॑यन् वैश्वा॑नर॒ यत् पि॒त्रोर् अदी॑देः ॥ ६ ००७ ०४
वैश्वा॑नर॒ तव॒ तानि॑ व्र॒तानि॑ म॒हान्य् अ॑ग्ने॒ नकि॒र् आ द॑धर्ष ।
यज् जाय॑मानः पि॒त्रोर् उ॒पस्थे ऽवि॑न्दः के॒तुं व॒युने॒ष्व् अ॒ह्नाम् ॥ ६ ००७ ०५
वै॒श्वा॒न॒रस्य॒ विमि॑तानि॒ चक्ष॑सा॒ सानू॑नि दि॒वो अ॒मृत॑स्य के॒तुना॑ ।
तस्येद् उ॒ विश्वा॒ भुव॒नाधि॑ मू॒र्धनि॑ व॒या इ॑व रुरुहुः स॒प्त वि॒स्रुहः॑ ॥ ६ ००७ ०६

वि यो रजांस्य् अमिमीत सुक्रतुर् वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथे ऽदब्धो गोपा अमृतस्य रक्षिता ॥ ६ ००७ ०७

(४४९)
पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर् नव्यसी शुचिः सोम इव पवते चारुर् अग्नये ॥ ६ ००८ ०१
स जायमानः परमे व्योमनि व्रतान्य् अग्निर् व्रतपा अरक्षत ।
व्य् अ१न्तरिक्षम् अमिमीत सुक्रतुर् वैश्वानरो महिना नाकम् अस्पृशत् ॥ ६ ००८ ०२
व्य् अस्तभ्नाद् रोदसी मित्रो अद्भुतो ऽन्तर्वावद् अकृणोज् ज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद् वैश्वानरो विश्वम् अधत्त वृष्ण्यम् ॥ ६ ००८ ०३
अपाम् उपस्थे महिषा अगृभ्णत विशो राजानम् उप तस्थुर् ऋग्मियम् ।
आ दूतो अग्निम् अभरद् विवस्वतो वैश्वानरम् मातरिश्वा परावतः ॥ ६ ००८ ०४
युगे-युगे विदथ्यं गृणद्भ्यो ऽग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्न् अघशंसम् अजर नीचा नि वृश्च वनिनं न तेजसा ॥ ६ ००८ ०५
अस्माकम् अग्ने मघवत्सु धारयानामि क्षत्रम् अजरं सुवीर्यम् ।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजम् अग्ने तवोतिभिः ॥ ६ ००८ ०६
अदब्धेभिस् तव गोपाभिर् इष्टे ऽस्माकम् पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारी स्तवानः ॥ ६ ००८ ०७

(४५०)
अहश् च कृष्णम् अहर् अर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज् ज्योतिषाग्निस् तमांसि ॥ ६ ००९ ०१
नाहं तन्तुं न वि जानाम्य् ओतुं न यं वयन्ति समरे ऽतमानाः ।
कस्य स्वित् पुत्र इह वक्त्वानि परो वदात्य् अवरेण पित्रा ॥ ६ ००९ ०२
स इत् तन्तुं स वि जानात्य् ओतुं स वक्त्वान्य् ऋतुथा वदाति ।
य ईं चिकेतद् अमृतस्य गोपा अवश् चरन् परो अन्येन पश्यन् ॥ ६ ००९ ०३

अयं होता प्रथमः पश्यतेमम् इदं ज्योतिर् अमृतम् मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तो ऽमर्त्यस् तन्वा३ वर्धमानः ॥ ६ ००९ ०४
ध्रुवं ज्योतिर् निहितं दृशये कम् मनो जविष्ठम् पतयत्स्व् अन्तः ।
विश्वे देवाः समनसः सकेता एकं क्रतुम् अभि वि यन्ति साधु ॥ ६ ००९ ०५
वि मे कर्णा पतयतो वि चक्षुर् वी३दं ज्योतिर् हृदय आहितं यत् ।
वि मे मनश् चरति दूरआधीः किं स्विद् वक्ष्यामि किम् उ नू मनिष्ये ॥ ६ ००९ ०६
विश्वे देवा अनमस्यन् भियानास् त्वाम् अग्ने तमसि तस्थिवांसम् ।
वैश्वानरो ऽवतूतये नो ऽमर्त्यो ऽवतूतये नः ॥ ६ ००९ ०७

(४५१)
पुरो वो मन्द्रं दिव्यं सुवृक्तिम् प्रयति यज्ञे अग्निम् अध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥ ६ ०१० ०१
तम् उ द्युमः पुर्वणीक होतर् अग्ने अग्निभिर् मनुष इधानः ।
स्तोमं यम् अस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते ॥ ६ ०१० ०२
पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस् तम् ऊतिभिश् चित्रशोचिर् व्रजस्य साता गोमतो दधाति ॥ ६ ०१० ०३
आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।
अध बहु चित् तम ऊर्म्यायास् तिरः शोचिषा ददृशे पावकः ॥ ६ ०१० ०४
नू नश् चित्रम् पुरुवाजाभिर् ऊती अग्ने रयिम् मघवद्भ्यश् च धेहि ।
ये राधसा श्रवसा चात्य् अन्यान् सुवीर्येभिश् चाभि सन्ति जनान् ॥ ६ ०१० ०५
इमं यज्ञं चनो धा अग्न उशन् यं त आसानो जुहुते हविष्मान् ।
भरद्वाजेषु दधिषे सुवृक्तिम् अवीर् वाजस्य गध्यस्य सातौ ॥ ६ ०१० ०६
वि द्वेषांसीनुहि वर्धयेळाम् मदेम शतहिमाः सुवीराः ॥ ६ ०१० ०७

(४५२)
यजस्व होतर् इषितो यजीयान् अग्ने बाधो मरुतां न प्रयुक्ति ।

आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥ ६ ०११ ०१
त्वं होता मन्द्रतमो नो अध्रुग् अन्तर् देवो विदथा मर्त्येषु ।
पावकया जुह्वा ३ वह्निर् आसाग्ने यजस्व तन्व १ं तव स्वाम् ॥ ६ ०११ ०२
धन्या चिद् धि त्वे धिषणा वष्टि प्र देवाञ् जन्म गृणते यजध्यै ।
वेपिष्ठो अङ्गिरसां यद् ध विप्रो मधु छन्दो भनति रेभ इष्टौ ॥ ६ ०११ ०३
अदिद्युतत् स्व् अपाको विभावाग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसम् पञ्च जनाः ॥ ६ ०११ ०४
वृञ्जे ह यन् नमसा बर्हिर् अग्नाव् अयामि स्रुग् घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥ ६ ०११ ०५
दशस्या नः पुर्वणीक होतर् देवेभिर् अग्ने अग्निभिर् इधानः ।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ॥ ६ ०११ ०६

(४५३)
मध्ये होता दुरोणे बर्हिषो राळ् अग्निस् तोदस्य रोदसी यजध्यै ।
अयं स सूनुः सहस ऋतावा दूरात् सूर्यो न शोचिषा ततान ॥ ६ ०१२ ०१
आ यस्मिन् त्वे स्व् अपाके यजत्र यक्षद् राजन् सर्वतातेव नु द्यौः ।
त्रिषधस्थस् ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै ॥ ६ ०१२ ०२
तेजिष्ठा यस्यारतिर् वनेराट् तोदो अध्वन् न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्न् अमर्त्यो ऽवर्त्र ओषधीषु ॥ ६ ०१२ ०३
सास्माकेभिर् एतरी न शूषैर् अग्नि ष्टवे दम आ जातवेदाः ।
द्रवन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥ ६ ०१२ ०४
अध स्मास्य पनयन्ति भासो वृथा यत् तक्षद् अनुयाति पृथ्वीम् ।
सद्यो यः स्यन्द्रो विषितो धवीयान् ऋणो न तायुर् अति धन्वा राट् ॥ ६ ०१२ ०५
स त्वं नो अर्वन् निदाया विश्वेभिर् अग्ने अग्निभिर् इधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥ ६ ०१२ ०६

(४५४)

त्वद् विश्वा॑ सुभग॒ सौभ॑गा॒न्य् अग्ने॒ वि य॑न्ति व॒निनो॒ न व॒याः ।
श्रु॒ष्टी र॒यिर् वाजो॑ वृत्र॒तूर्ये॑ दि॒वो वृ॒ष्टिर् ईड्यो॑ री॒तिर् अ॒पाम् ॥ ६ ०१३ ०१
त्वम् भगो॑ न॒ आ हि रत्न॑म् इ॒षे परि॑ज्मेव क्षयसि द॒स्मव॑र्चाः ।
अग्ने॑ मि॒त्रो न बृ॑ह॒त ऋ॒तस्या॑सि क्ष॒त्ता वा॒मस्य॑ देव॒ भूरेः॑ ॥ ६ ०१३ ०२
स सत्प॑तिः॒ शव॑सा हन्ति वृ॒त्रम् अग्ने॒ विप्रो॒ वि प॒णेर् भ॑र्ति॒ वाज॑म् ।
यं त्वम् प्र॑चेत ऋतजात रा॒या स॒जोषा॒ नप्त्रा॒पां हि॒नोषि॑ ॥ ६ ०१३ ०३
यस् ते॑ सूनो सहसो गी॒र्भिर् उ॒क्थैर् य॒ज्ञैर् मर्तो॒ निशि॑तिं वे॒द्यान॑ट् ।
विश्वं॒ स दे॑व॒ प्रति॒ वार॑म् अग्ने ध॒त्ते धा॒न्य १॒ म् पत्य॑ते वसव्याइः ॥ ६ ०१३ ०४
ता नृभ्य॒ आ सौ॑श्रव॒सा सु॒वीराग्ने॑ सूनो सहसः पु॒ष्यसे॑ धाः ।
कृ॒णोषि॒ यच् छव॑सा॒ भूरि॑ प॒श्वो वयो॒ वृका॑यार॒ये जसु॑रये ॥ ६ ०१३ ०५
व॒द्मा सू॑नो सहसो नो॒ विहा॑या॒ अग्ने॑ तो॒कं तन॑यं वा॒जि नो॑ दाः ।
विश्वा॑भिर् गी॒र्भिर् अ॒भि पू॒र्तिम् अ॑श्या॒म् मदे॑म श॒तहि॑माः सु॒वीराः॑ ॥ ६ ०१३ ०६

(४५५)

अ॒ग्ना यो मर्त्यो॒ दुवो॒ धियं॑ जु॒जोष॑ धी॒तिभिः॑ ।
भस॒न् नु ष प्र पू॒र्व्य इषं॑ वुरी॒ताव॑से ॥ ६ ०१४ ०१
अ॒ग्निर् इद् धि प्रचे॑ता अ॒ग्निर् वे॒धस्त॑म॒ ऋषिः॑ ।
अ॒ग्निं होता॑रम् ईळते य॒ज्ञेषु॒ मनु॑षो॒ विशः॑ ॥ ६ ०१४ ०२
नाना॒ ह्य अ॒ १॒ ग्ने ऽव॑से॒ स्पर्ध॑न्ते॒ रायो॑ अ॒र्यः ।
तूर्व॑न्तो॒ दस्यु॑म् आ॒यवो॑ व्र॒तैः सीक्ष॑न्तो अव्र॒तम् ॥ ६ ०१४ ०३
अ॒ग्निर् अ॒प्साम् ऋ॑ती॒षहं॑ वी॒रं द॑दाति॒ सत्प॑तिम् ।
यस्य॒ त्रस॑न्ति॒ शव॑सः संचक्षि॒ शत्र॑वो भि॒या ॥ ६ ०१४ ०४
अ॒ग्निर् हि वि॒द्मना॑ नि॒दो दे॒वो मर्त॑म् उरु॒ष्यति॑ ।
स॒हावा॒ यस्यावृ॑तो र॒यिर् वाजे॒ष्व् अवृ॑तः ॥ ६ ०१४ ०५
अच्छा॑ नो मित्रमहो देव दे॒वान् अग्ने॒ वोचः॑ सुम॒तिं रोद॑स्योः ।
वी॒हि स्व॒स्तिं सु॑क्षि॒तिं दि॒वो नॄन् द्वि॒षो अंहां॑सि दुरि॒ता त॑रेम॒ ता त॑रेम॒ तवाव॑सा तरेम

॥ ।

(४५६)
इमम् ऊ षु वो अतिथिम् उषर्बुधं विश्वासां विशाम् पतिम् ऋञ्जसे गिरा ।
वेतीद् दिवो जनुषा कच् चिद् आ शुचिर् ज्योक् चिद् अत्ति गर्भो यद् अच्युतम् ॥ ६ ०१५ ०१
मित्रं न यं सुधितम् भृगवो दधुर् वनस्पताव् ईड्यम् ऊर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर् महयसे दिवे-दिवे ॥ ६ ०१५ ०२
स त्वं दक्षस्यावृको वृधो भूर् अर्यः परस्यान्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्व् आ छर्दिर् यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥ ।
द्युतानं वो अतिथिं स्वर्णरम् अग्निं होतारम् मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर् हव्यवाहम् अरतिं देवम् ऋञ्जसे ॥ ६ ०१५ ०४
पावकया यश् चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तूर्वन् न यामन्न् एतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥ ६ ०१५ ०५
अग्निम्-अग्निं वः समिधा दुवस्यत प्रियम्-प्रियं वो अतिथिं गृणीषणि ।
उप वो गीर्भिर् अमृतं विवासत ।
देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः ॥ ६ ०१५ ०६
समिद्धम् अग्निं समिधा गिरा गृणे शुचिम् पावकम् पुरो अध्वरे ध्रुवम् ।
विप्रं होतारम् पुरुवारम् अद्रुहं कविं सुम्नैर् ईमहे जातवेदसम् ॥ ६ ०१५ ०७
त्वां दूतम् अग्ने अमृतं युगे-युगे हव्यवाहं दधिरे पायुम् ईड्यम् ।
देवासश् च मर्तासश् च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ ६ ०१५ ०८
विभूषन्न् अग्न उभयाँ अनु व्रता दूतो देवानां रजसी सम् ईयसे ।
यत् ते धीतिं सुमतिम् आवृणीमहे ऽध स्मा नस् त्रिवरूथः शिवो भव ॥ ६ ०१५ ०९
तं सुप्रतीकं सुदृशं स्वञ्चम् अविद्वांसो विदुष्टरं सपेम ।
स यक्षद् विश्वा वयुनानि विद्वान् प्र हव्यम् अग्निर् अमृतेषु वोचत् ॥ ६ ०१५ १०
तम् अग्ने पास्य् उत तम् पिपर्षि यस् त आनट् कवये शूर धीतिम् ।
यज्ञस्य वा निशितिं वोदितिं वा तम् इत् पृणक्षि शवसोत राया ॥ ६ ०१५ ११
त्वम् अग्ने वनुष्यतो नि पाहि त्वम् उ नः सहसावन्न् अवद्यात् ।

सं त्वा ध्वस्मन्वद् अभ्य् एतु पाथः सं रयि स्पृहयाय्यः सहस्री ॥ ६ ०१५ १२
अग्निर् होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।
देवानाम् उत यो मर्त्यानां यजिष्ठः स प्र यजताम् ऋतावा ॥ ६ ०१५ १३
अग्ने यद् अद्य विशो अध्वरस्य होतः पावकशोचे वेष् ट्वं हि यज्वा ।
ऋता यजासि महिना वि यद् भूर् हव्या वह यविष्ठ या ते अद्य ॥ ६ ०१५ १४
अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।
अवा नो मघवन् वाजसाताव् अग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥
६ ०१५ १५
अग्ने विश्वेभिः स्वनीक देवैर् ऊर्णावन्तम् प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु ॥ ६ ०१५ १६
इमम् उ त्यम् अथर्ववद् अग्निम् मन्थन्ति वेधसः ।
यम् अङ्कूयन्तम् आनयन्न् अमूरं श्याव्याभ्यः ॥ ६ ०१५ १७
जनिष्वा देववीतये सर्वताता स्वस्तये ।
आ देवान् वक्ष्य् अमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥ ६ ०१५ १८
वयम् उ त्वा गृहपते जनानाम् अग्ने अकर्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस् तेजसा सं शिशाधि ॥ ६ ०१५ १९

(४५७)
त्वम् अग्ने यज्ञानां होता विश्वेषां हितः ।
देवेभिर् मानुषे जने ॥ ६ ०१६ ०१
स नो मन्द्राभिर् अध्वरे जिह्वाभिर् यजा महः ।
आ देवान् वक्षि यक्षि च ॥ ६ ०१६ ०२
वेत्था हि वेधो अध्वनः पथश् च देवाञ्जसा ।
अग्ने यज्ञेषु सुक्रतो ॥ ६ ०१६ ०३
त्वाम् ईळे अध द्विता भरतो वाजिभिः शुनम् ।
ईजे यज्ञेषु यज्ञियम् ॥ ६ ०१६ ०४
त्वम् इमा वार्या पुरु दिवोदासाय सुन्वते ।

भरद्वाजाय दाशुषे ॥ ६ ०१६ ०५
त्वं दूतो अमर्त्य आ वहा दैव्यं जनम् ।
शृण्वन् विप्रस्य सुष्टुतिम् ॥ ६ ०१६ ०६
त्वाम् अग्ने स्वाध्यो ३ मर्तासो देववीतये ।
यज्ञेषु देवम् ईळते ॥ ६ ०१६ ०७
तव प्र यक्षि संदृशम् उत क्रतुं सुदानवः ।
विश्वे जुषन्त कामिनः ॥ ६ ०१६ ०८
त्वं होता मनुर्हितो वह्निर् आसा विदुष्टरः ।
अग्ने यक्षि दिवो विशः ॥ ६ ०१६ ०९
अग्न आ याहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥ ६ ०१६ १०
तं त्वा समिद्भिर् अङ्गिरो घृतेन वर्धयामसि ।
बृहच् छोचा यविष्ठ्य ॥ ६ ०१६ ११
स नः पृथु श्रवाय्यम् अच्छा देव विवाससि ।
बृहद् अग्ने सुवीर्यम् ॥ ६ ०१६ १२
त्वाम् अग्ने पुष्कराद् अध्य् अथर्वा निर् अमन्थत ।
मूर्ध्नो विश्वस्य वाघतः ॥ ६ ०१६ १३
तम् उ त्वा दध्यङ्ङ् ऋषिः पुत्र ईधे अथर्वणः ।
वृत्रहणम् पुरंदरम् ॥ ६ ०१६ १४
तम् उ त्वा पाथ्यो वृषा सम् ईधे दस्युहन्तमम् ।
धनंजयं रणे-रणे ॥ ६ ०१६ १५
एह्य ऊ षु ब्रवाणि ते ऽग्न इत्थेतरा गिरः ।
एभिर् वर्धास इन्दुभिः ॥ ६ ०१६ १६
यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
तत्रा सदः कृणवसे ॥ ६ ०१६ १७
नहि ते पूर्तम् अक्षिपद् भुवन् नेमानां वसो ।
अथा दुवो वनवसे ॥ ६ ०१६ १८
अग्निर् अगामि भारतो वृत्रहा पुरुचेतनः ।

दिवो॑दासस्य॒ सत्प॑तिः ॥ ६ ०१६ १९
स हि विश्वाति॒ पार्थि॑वा र॒यिं दाश॑न् महित्व॒ना ।
व॒न्वन्न् अवा॑तो॒ अस्तृ॑तः ॥ ६ ०१६ २०
स प्र॑त्न॒वन् नवी॑य॒साग्ने॑ द्यु॒म्नेन॑ सं॒यता॑ ।
बृ॒हत् त॑तन्थ भा॒नुना॑ ॥ ६ ०१६ २१
प्र वः॑ सखायो अ॒ग्नये॒ स्तोमं॑ य॒ज्ञं च॑ धृष्णु॒या ।
अर्च॒ गाय॑ च वे॒धसे॑ ॥ ६ ०१६ २२
स हि यो मानु॑षा यु॒गा सीद॒द् धोता॑ क॒विक्र॑तुः ।
दू॒तश् च॑ हव्य॒वाह॑नः ॥ ६ ०१६ २३
ता राजा॑ना॒ शुचि॑व्रतादि॒त्यान् मारु॑तं ग॒णम् ।
वसो॒ यक्षी॒ह रोद॑सी ॥ ६ ०१६ २४
वस्वी॑ ते अग्ने॒ संदृ॑ष्टिर् इषय॒ते मर्त्या॑य ।
ऊर्जो॑ नपाद् अ॒मृत॑स्य ॥ ६ ०१६ २५
क्रत्वा॒ दा अ॑स्तु॒ श्रेष्ठो॑ ऽ॒द्य त्वा॑ व॒न्वन् सु॒रेक्णाः॑ ।
मर्त॑ आनाश सुवृ॒क्तिम् ॥ ६ ०१६ २६
ते ते॑ अग्ने॒ त्वोता॑ इ॒षय॑न्तो॒ विश्व॒म् आयुः॑ ।
तर॑न्तो अ॒र्यो अरा॑तीर् व॒न्वन्तो॑ अ॒र्यो अरा॑तीः ॥ ६ ०१६ २७
अ॒ग्निस् ति॒ग्मेन॑ शो॒चिषा॒ यास॒द् विश्वं॒ न्य् अ १॒ त्रिण॑म् ।
अ॒ग्निर् नो॑ वनते र॒यिम् ॥ ६ ०१६ २८
सु॒वीरं॑ र॒यिम् आ भ॑र॒ जात॑वेदो॒ विच॑र्षणे ।
ज॒हि रक्षां॑सि सुक्रतो ॥ ६ ०१६ २९
त्वं नः॑ पा॒ह्य् अंह॑सो॒ जात॑वेदो अघाय॒तः ।
रक्षा॑ णो ब्रह्मणस् कवे ॥ ६ ०१६ ३०
यो नो॑ अग्ने दु॒रेव॒ आ मर्तो॑ व॒धाय॒ दाश॑ति ।
तस्मा॑न् नः पा॒ह्य् अंह॑सः ॥ ६ ०१६ ३१
त्वं तं दे॑व जि॒ह्वया॒ परि॑ बाधस्व दु॒ष्कृत॑म् ।
मर्तो॒ यो नो॒ जिघां॑सति ॥ ६ ०१६ ३२
भ॒रद्वा॑जाय स॒प्रथः॒ शर्म॑ यच्छ सहन्त्य ।

अग्ने वरेण्यं वसु ॥ ६ ०१६ ३३
अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया ।
समिद्धः शुक्र आहुतः ॥ ६ ०१६ ३४
गर्भे मातुः पितुष् पिता विदिद्युतानो अक्षरे ।
सीदन्न् ऋतस्य योनिम् आ ॥ ६ ०१६ ३५
ब्रह्म प्रजावद् आ भर जातवेदो विचर्षणे ।
अग्ने यद् दीदयद् दिवि ॥ ६ ०१६ ३६
उप त्वा रण्वसंदृशम् प्रयस्वन्तः सहस्कृत ।
अग्ने ससृज्महे गिरः ॥ ६ ०१६ ३७
उप छायाम् इव घृणेर् अगन्म शर्म ते वयम् ।
अग्ने हिरण्यसंदृशः ॥ ६ ०१६ ३८
य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः ।
अग्ने पुरो रुरोजिथ ॥ ६ ०१६ ३९
आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति ।
विशाम् अग्निं स्वध्वरम् ॥ ६ ०१६ ४०
प्र देवं देववीतये भरता वसुवित्तमम् ।
आ स्वे योनौ नि षीदतु ॥ ६ ०१६ ४१
आ जातं जातवेदसि प्रियं शिशीतातिथिम् ।
स्योन आ गृहपतिम् ॥ ६ ०१६ ४२
अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः ।
अरं वहन्ति मन्यवे ॥ ६ ०१६ ४३
अच्छा नो याह्य आ वहाभि प्रयांसि वीतये ।
आ देवान् सोमपीतये ॥ ६ ०१६ ४४
उद् अग्ने भारत द्युमद् अजस्रेण दविद्युतत् ।
शोचा वि भाह्य अजर ॥ ६ ०१६ ४५
वीती यो देवम् मर्तो दुवस्येद् अग्निम् ईळीताध्वरे हविष्मान् ।
होतारं सत्ययजं रोदस्योर् उत्तानहस्तो नमसा विवासेत् ॥ ६ ०१६ ४६
आ ते अग्न ऋचा हविर् हृदा तष्टम् भरामसि ।

ते ते भवन्तूक्षण ऋषभासो वशा उत ॥ ६ ०१६ ४७
अग्निं देवासो अग्रियम् इन्धते वृत्रहन्तमम् ।
येना वसून्य् आभृता तृळ्हा रक्षांसि वाजिना ॥ ६ ०१६ ४८

(४५८)
पिबा सोमम् अभि यम् उग्र तर्द ऊर्वं गव्यम् महि गृणान इन्द्र ।
वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रम् अमित्रिया शवोभिः ॥ ६ ०१७ ०१
स ईम् पाहि य ऋजीषी तरुत्रो यः शिप्रवान् वृषभो यो मतीनाम् ।
यो गोत्रभिद् वज्रभृद् यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् ॥ ६ ०१७ ०२
एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँर् अभि गा इन्द्र तृन्धि ॥ ६ ०१७ ०३
ते त्वा मदा बृहद् इन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम् ।
महाम् अनूनं तवसं विभूतिम् मत्सरासो जर्हृषन्त प्रसाहम् ॥ ६ ०१७ ०४
येभिः सूर्यम् उषसम् मन्दसानो ऽवासयो ऽप दृळ्हानि दर्द्रत् ।
महाम् अद्रिम् परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस् परि स्वात् ॥ ६ ०१७ ०५
तव क्रत्वा तव तद् दंसनाभिर् आमासु पक्वं शच्या नि दीधः ।
और्णोर् दुर उस्रियाभ्यो वि दृळ्होद् ऊर्वाद् गा असृजो अङ्गिरस्वान् ॥ ६ ०१७ ०६
पप्राथ क्षाम् महि दंसो व्य् उ१ र्वीम् उप द्याम् ऋष्वो बृहद् इन्द्र स्तभायः ।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ॥ ६ ०१७ ०७
अध त्वा विश्वे पुर इन्द्र देवा एकं तवसं दधिरे भराय ।
अदेवो यद् अभ्य् औहिष्ट देवान् स्वर्षाता वृणत इन्द्रम् अत्र ॥ ६ ०१७ ०८
अध द्यौश् चित् ते अप सा नु वज्राद् द्वितानमद् भियसा स्वस्य मन्योः ।
अहिं यद् इन्द्रो अभ्य् ओहसानं नि चिद् विश्वायुः शयथे जघान ॥ ६ ०१७ ०९
अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृतच् छताश्रिम् ।
निकामम् अरमणसं येन नवन्तम् अहिं सम् पिणग् ऋजीषिन् ॥ ६ ०१७ १०
वर्धान् यं विश्वे मरुतः सजोषाः पचच् छतम् महिषाँ इन्द्र तुभ्यम् ।
पूषा विष्णुस् त्रीणि सरांसि धावन् वृत्रहणम् मदिरम् अंशुम् अस्मै ॥ ६ ०१७ ११

आ क्षोदो महि वृतं नदीनाम् परिष्ठितम् असृज ऊर्मिम् अपाम् ।
तासाम् अनु प्रवत इन्द्र पन्थाम् प्रार्दयो नीचीर् अपसः समुद्रम् ॥ ६ ०१७ १२
एवा ता विश्वा चकृवांसम् इन्द्रम् महाम् उग्रम् अजुर्यं सहोदाम् ।
सुवीरं त्वा स्वायुधं सुवज्रम् आ ब्रह्म नव्यम् अवसे ववृत्यात् ॥ ६ ०१७ १३
स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान् ।
भरद्वाजे नृवत इन्द्र सूरीन् दिवि च स्मैधि पार्ये न इन्द्र ॥ ६ ०१७ १४
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ ६ ०१७ १५

(४५९)
तम् उ ष्टुहि यो अभिभूत्योजा वन्वन्न् अवातः पुरुहूत इन्द्रः ।
अषाळ्हम् उग्रं सहमानम् आभिर् गीर्भिर् वर्ध वृषभं चर्षणीनाम् ॥ ६ ०१८ ०१
स युध्मः सत्वा खजकृत् समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ।
बृहद्रेणुश् च्यवनो मानुषीणाम् एकः कृष्टीनाम् अभवत् सहावा ॥ ६ ०१८ ०२
त्वं ह नु त्यद् अदमायो दस्यूँर् एकः कृष्टीर् अवनोर् आर्याय ।
अस्ति स्विन् नु वीर्यं१ तत् त इन्द्र न स्विद् अस्ति तद् ऋतुथा वि वोचः ॥ ६ ०१८ ०३
सद् इद् धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस् तुरस्य ।
उग्रम् उग्रस्य तवसस् तवीयो ऽरध्रस्य रध्रतुरो बभूव ॥ ६ ०१८ ०४
तन् नः प्रत्नं सख्यम् अस्तु युष्मे इत्था वदद्भिर् वलम् अङ्गिरोभिः ।
हन्न् अच्युतच्युद् दस्मेषयन्तम् ऋणोः पुरो वि दुरो अस्य विश्वाः ॥ ६ ०१८ ०५
स हि धीभिर् हव्यो अस्त्य् उग्र ईशानकृन् महति वृत्रतूर्ये ।
स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत् समत्सु ॥ ६ ०१८ ०६
स मज्मना जनिम मानुषाणाम् अमर्त्येन नाम्नाति प्र सर्स्रे ।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥ ६ ०१८ ०७
स यो न मुहे न मिथू जनो भूत् सुमन्तुनामा चुमुरिं धुनिं च ।
वृणक् पिप्रुं शम्बरं शुष्णम् इन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ॥ ६ ०१८ ०८
उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथम् इन्द्र तिष्ठ ।

धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः ॥ ६ ०१८ ०९
अग्निर् न शुष्कं वनम् इन्द्र हेती रक्षो नि धक्ष्य् अशनिर् न भीमा ।
गम्भीरय ऋष्वया यो रुरोजाध्वानयद् दुरिता दम्भयच् च ॥ ६ ०१८ १०
आ सहस्रम् पथिभिर् इन्द्र राया तुविद्युम्न तुविवाजेभिर् अर्वाक् ।
याहि सूनो सहसो यस्य नू चिद् अदेव ईशे पुरुहूत योतोः ॥ ६ ०१८ ११
प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर् दिवो ररप्शे महिमा पृथिव्याः ।
नास्य शत्रुर् न प्रतिमानम् अस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥ ६ ०१८ १२
प्र तत् ते अद्या करणं कृतम् भूत् कुत्सं यद् आयुम् अतिथिग्वम् अस्मै ।
पुरू सहस्रा नि शिशा अभि क्षाम् उत् तूर्वयाणं धृषता निनेथ ॥ ६ ०१८ १३
अनु त्वाहिघ्ने अध देव देवा मदन् विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः ॥ ६ ०१८ १४
अनु द्यावापृथिवी तत् त ओजो ऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत् ते अस्त्य् उक्थं नवीयो जनयस्व यज्ञैः ॥ ६ ०१८ १५

(४६०)
महाँ इन्द्रो नृवद् आ चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग् वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर् भूत् ॥ ६ ०१९ ०१
इन्द्रम् एव धिषणा सातये धाद् बृहन्तम् ऋष्वम् अजरं युवानम् ।
अषाळ्हेन शवसा शूशुवांसं सद्यश् चिद् यो वावृधे असामि ॥ ६ ०१९ ०२
पृथू करस्ना बहुला गभस्ती अस्मद्र्य१क् सम् मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्य् आ ववृत्स्वाजौ ॥ ६ ०१९ ०३
तं व इन्द्रं चतिनम् अस्य शाकैर् इह नूनं वाजयन्तो हुवेम ।
यथा चित् पूर्वे जरितार आसुर् अनेद्या अनवद्या अरिष्टाः ॥ ६ ०१९ ०४
धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
सं जग्मिरे पथ्या३ रायो अस्मिन् समुद्रे न सिन्धवो यादमानाः ॥ ६ ०१९ ०५
शविष्ठं न आ भर शूर शव ओजिष्ठम् ओजो अभिभूत उग्रम् ।
विश्वा द्युम्ना वृष्ण्या मानुषाणाम् अस्मभ्यं दा हरिवो मादयध्यै ॥ ६ ०१९ ०६

यस् ते॒ मदः॑ पृतना॒षाळ् अमृ॑ध्र॒ इन्द्र॒ तं न॒ आ भ॑र शूशु॒वांस॑म् ।
येन॑ तो॒कस्य॒ तन॑यस्य सा॒तौ मं॑सी॒महि॑ जिगी॒वांस॒स् त्वोताः॑ ॥ ६ ०१९ ०७
आ नो॑ भर॒ वृष॑णं॒ शुष्म॑म् इन्द्र धन॒स्पृतं॑ शूशु॒वांसं॑ सु॒दक्ष॑म् ।
येन॒ वंसा॑म॒ पृत॑नासु॒ शत्रू॒न् तवो॒तिभि॑र् उ॒त जा॒मीँर् अजा॑मीन् ॥ ६ ०१९ ०८
आ ते॒ शुष्मो॑ वृषभ॒ ए॑तु प॒श्चाद् ओत्त॒राद् अ॑ध॒राद् आ पु॒रस्ता॑त् ।
आ वि॒श्वतो॑ अ॒भि सम् ए॒त्व् अ॒र्वाङ् इन्द्र॑ द्यु॒म्नं स्व॑र्वद् धेह्य् अ॒स्मे ॥ ६ ०१९ ०९
नृ॒वत् त॑ इन्द्र॒ नृत॑माभिर् ऊ॒ती वं॑सी॒महि॑ वा॒मं श्रोम॑तेभिः ।
ईक्षे॒ हि वस्व॑ उ॒भय॑स्य राज॒न् धा रत्न॒म् महि॑ स्थू॒रम् बृ॒हन्त॑म् ॥ ६ ०१९ १०
म॒रुत्व॑न्तं वृष॒भं वा॑वृधा॒नम् अक॑वारिं दि॒व्यं शा॒सम् इन्द्र॑म् ।
वि॒श्वा॒साह॒म् अव॑से॒ नूत॑नायो॒ग्रं स॑हो॒दाम् इ॒ह तं हु॑वेम ॥ ६ ०१९ ११
जनं॑ वज्रिन् महि॑ चि॒न् मन्य॑मानम् ए॒भ्यो नृभ्यो॑ रन्धया॒ येष्व् अस्मि॑ ।
अधा॒ हि त्वा॑ पृथि॒व्यां शूर॑सातौ॒ हवा॑महे॒ तन॑ये॒ गोष्व् अ॒प्सु ॥ ६ ०१९ १२
व॒यं त॑ ए॒भिः पु॑रुहूत स॒ख्यैः शत्रोः॑-शत्रो॒र् उत्त॑र॒ इत् स्या॑म ।
घ्नन्तो॑ वृ॒त्राण्य् उ॒भया॑नि शूर॒ रा॒या म॑देम बृह॒ता त्वोताः॑ ॥ ६ ०१९ १३

(४६१)
द्यौर् न य इ॑न्द्रा॒भि भूमा॒र्यस् त॒स्थौ र॒यिः शव॑सा पृ॒त्सु जना॑न् ।
तं नः॑ स॒हस्र॑भरम् उर्व॒रासां॑ द॒द्धि सू॑नो सहसो वृत्र॒तुर॑म् ॥ ६ ०२० ०१
दि॒वो न तुभ्य॒म् अन्व् इ॑न्द्र स॒त्रासु॒र्यं॑ दे॒वेभि॑र् धायि॒ विश्व॑म् ।
अहिं॒ यद् वृ॒त्रम् अ॒पो व॑व्रि॒वांसं॒ हन्न् ऋ॑जीषि॒न् विष्णु॑ना सचा॒नः ॥ ६ ०२० ०२
तूर्व॒न्न् ओजी॑यान् त॒वस॒स् तवी॑यान् कृ॒तब्र॒ह्मेन्द्रो॑ वृ॒द्धम॑हाः ।
राजा॑भवन् मधु॑नः सो॒म्यस्य॒ विश्वा॑सां॒ यत् पु॒रां द॒र्त्नुम् आव॑त् ॥ ६ ०२० ०३
श॒तैर् अ॑पद्रन् प॒णय॑ इ॒न्द्रात्र॒ दशो॑णये क॒वये॒ ऽर्कसा॑तौ ।
व॒धैः शुष्ण॑स्याशु॒ष॑स्य मा॒याः पि॒त्वो नारि॑रेची॒त् किं च॒न प्र ॥ ६ ०२० ०४
म॒हो द्रु॒हो अप॑ वि॒श्वायु॑ धायि॒ वज्र॑स्य॒ यत् पत॑ने॒ पादि॒ शुष्णः॑ ।
उ॒रु ष स॒रथं॒ सार॑थये क॒र् इन्द्रः॒ कुत्सा॑य॒ सूर्य॑स्य सा॒तौ ॥ ६ ०२० ०५
प्र श्ये॒नो न म॑दि॒रम् अं॒शुम् अ॑स्मै॒ शिरो॑ दा॒सस्य॒ नमु॑चेर् मथा॒यन् ।
प्राव॒न् नमीं॑ सा॒प्यं स॒सन्त॑म् पृ॒णग् रा॒या सम् इ॒षा सं स्व॒स्ति ॥ ६ ०२० ०६

वि पिप्रोर् अहिमायस्य दृळ्हाः पुरो वज्रिञ् छवसा न दर्दः ।
सुदामन् तद् रेक्णो अप्रमृष्यम् ऋजिश्वने दात्रं दाशुषे दाः ॥ ६ ०२० ०७
स वेतसुं दशमायं दशोणिं तूतुजिम् इन्द्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वद् इभं द्योतनाय मातुर् न सीम् उप सृजा इयध्यै ॥ ६ ०२० ०८
स ईं स्पृधो वनते अप्रतीतो बिभ्रद् वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद् धरी अध्य् अस्तेव गर्ते वचोयुजा वहत इन्द्रम् ऋष्वम् ॥ ६ ०२० ०९
सनेम ते ऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः ।
सप्त यत् पुरः शर्म शारदीर् दर्द् धन् दासीः पुरुकुत्साय शिक्षन् ॥ ६ ०२० १०
त्वं वृध इन्द्र पूर्व्यो भूर् वरिवस्यन्न् उशने काव्याय ।
परा नववास्त्वम् अनुदेयम् महे पित्रे ददाथ स्वं नपातम् ॥ ६ ०२० ११
त्वं धुनिर् इन्द्र धुनिमतीर् ऋणोर् अपः सीरा न स्रवन्तीः ।
प्र यत् समुद्रम् अति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥ ६ ०२० १२
तव ह त्यद् इन्द्र विश्वम् आजौ सस्तो धुनीचुमुरी या ह सिष्वप् ।
दीदयद् इत् तुभ्यं सोमेभिः सुन्वन् दभीतिर् इध्मभृतिः पक्थ्य् अ १ र्कैः ॥ ६ ०२० १३

(४६२)
इमा उ त्वा पुरुतमस्य कारोर् हव्यं वीर हव्या हवन्ते ।
धियो रथेष्ठाम् अजरं नवीयो रयिर् विभूतिर् ईयते वचस्या ॥ ६ ०२१ ०१
तम् उ स्तुष इन्द्रं यो विदानो गिर्वाहसं गीर्भिर् यज्ञवृद्धम् ।
यस्य दिवम् अति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वम् ॥ ६ ०२१ ०२
स इत् तमो ऽवयुनं ततन्वत् सूर्येण वयुनवच् चकार ।
कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः ॥ ६ ०२१ ०३
यस् ता चकार स कुह स्विद् इन्द्रः कम् आ जनं चरति कासु विक्षु ।
कस् ते यज्ञो मनसे शं वराय को अर्क इन्द्र कतमः स होता ॥ ६ ०२१ ०४
इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत् सखायः ।
ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ॥ ६ ०२१ ०५
तम् पृच्छन्तो ऽवरासः पराणि प्रत्ना त इन्द्र श्रुत्यानु येमुः ।
अर्चामसि वीर ब्रह्मवाहो याद् एव विद्म तात् त्वा महान्तम् ॥ ६ ०२१ ०६

अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानम् अभि तत् सु तिष्ठ ।
तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥ ६ ०२१ ०७
स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।
त्वं ह्य आ ३ पिः प्रदिवि पितॄणां शश्वद् बभूथ सुहव एष्टौ ॥ ६ ०२१ ०८
प्रोतये वरुणम् मित्रम् इन्द्रम् मरुतः कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुम् अग्निम् पुरंधिं सवितारम् ओषधीः पर्वतांश् च ॥ ६ ०२१ ०९
इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्य् अर्चन्त्य् अर्कैः ।
श्रुधी हवम् आ हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वद् अस्ति ॥ ६ ०२१ १०
नू म आ वाचम् उप याहि विद्वान् विश्वेभिः सूनो सहसो यजत्रैः ।
ये अग्निजिह्वा ऋतसाप आसुर् ये मनुं चक्रुर् उपरं दसाय ॥ ६ ०२१ ११
स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद् विदानः ।
ये अश्रमास उरवो वहिष्ठास् तेभिर् न इन्द्राभि वक्षि वाजम् ॥ ६ ०२१ १२

(४६३)

य एक इद् धव्यश् चर्षणीनाम् इन्द्रं तं गीर्भिर् अभ्य् अर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यावान् सत्यः सत्वा पुरुमायः सहस्वान् ॥ ६ ०२२ ०१
तम् उ नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
नक्षद्दाभं ततुरिम् पर्वतेष्ठाम् अद्रोघवाचम् मतिभिः शविष्ठम् ॥ ६ ०२२ ०२
तम् ईमह इन्द्रम् अस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुर् अजरः स्वर्वान् तम् आ भर हरिवो मादयध्यै ॥ ६ ०२२ ०३
तन् नो वि वोचो यदि ते पुरा चिज् जरितार आनशुः सुम्नम् इन्द्र ।
कस् ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसो ऽसुरघ्नः ॥ ६ ०२२ ०४
तम् पृच्छन्ती वज्रहस्तं रथेष्ठाम् इन्द्रं वेपी वक्वरी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदाम् गातुम् इषे नक्षते तुम्रम् अच्छ ॥ ६ ०२२ ०५
अया ह त्यम् मायया वावृधानम् मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद् वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन् ॥ ६ ०२२ ०६
तं वो धिया नव्यस्या शविष्ठम् प्रत्नम् प्रत्नवत् परितंसयध्यै ।

स नो वक्षद् अनिमानः सुवह्मेन्द्रो विश्वान्य् अति दुर्गहाणि ॥ ६ ०२२ ०७
आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयो ऽन्तरिक्षा ।
तपा वृषन् विश्वतः शोचिषा तान् ब्रह्मद्विषे शोचय क्षाम् अपश् च ॥ ६ ०२२ ०८
भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस् त्वेषसंदृक् ।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥ ६ ०२२ ०९
आ संयतम् इन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीम् अमृध्राम् ।
यया दासान्य् आर्याणि वृत्रा करो वज्रिन् सुतुका नाहुषाणि ॥ ६ ०२२ १०
स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिर् आ गहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर् याहि तूयम् आ मद्र्यद्रिक् ॥ ६ ०२२ ११

(४६४)
सुत इत् त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।
यद् वा युक्ताभ्याम् मघवन् हरिभ्याम् बिभ्रद् वज्रम् बाह्वोर् इन्द्र यासि ॥ ६ ०२३ ०१
यद् वा दिवि पार्ये सुष्विम् इन्द्र वृत्रहत्ये ऽवसि शूरसातौ ।
यद् वा दक्षस्य बिभ्युषो अबिभ्यद् अरन्धयः शर्धत इन्द्र दस्यून् ॥ ६ ०२३ ०२
पाता सुतम् इन्द्रो अस्तु सोमम् प्रणेनीर् उग्रो जरितारम् ऊती ।
कर्ता वीराय सुष्वय उलोकं दाता वसु स्तुवते कीरये चित् ॥ ६ ०२३ ०३
गन्तेयान्ति सवना हरिभ्याम् बभ्रिर् वज्रम् पपिः सोमं ददिर् गाः ।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणत स्तोमवाहाः ॥ ६ ०२३ ०४
अस्मै वयं यद् वावान तद् विविष्म इन्द्राय यो नः प्रदिवो अपस् कः ।
सुते सोमे स्तुमसि शंसद् उक्थेन्द्राय ब्रह्म वर्धनं यथासत् ॥ ६ ०२३ ०५
ब्रह्माणि हि चकृषे वर्धनानि तावत् त इन्द्र मतिभिर् विविष्मः ।
सुते सोमे सुतपाः शंतमानि राण्ड्या क्रियास्म वक्षणानि यज्ञैः ॥ ६ ०२३ ०६
स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकम् इन्द्र ।
एदम् बर्हिर् यजमानस्य सीदोरुं कृधि त्वायत उलोकम् ॥ ६ ०२३ ०७
स मन्दस्वा ह्य् अनु जोषम् उग्र प्र त्वा यज्ञास इमे अश्नुवन्तु ।
प्रेमे हवासः पुरुहूतम् अस्मे आ त्वेयं धीर् अवस इन्द्र यम्याः ॥ ६ ०२३ ०८

तं वः सखायः सं यथा सुतेषु सोमेभिर् ईम् पृणता भोजम् इन्द्रम् ।
कुवित् तस्मा असति नो भराय न सुष्विम् इन्द्रो ऽवसे मृधाति ॥ ६ ०२३ ०९
एवेद् इन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयद् इन् मघोनः ।
असद् यथा जरित्र उत सूरिर् इन्द्रो रायो विश्ववारस्य दाता ॥ ६ ०२३ १०

(४६५)
वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।
अर्चत्र्यो मघवा नृभ्य उक्थैर् द्युक्षो राजा गिराम् अक्षितोतिः ॥ ६ ०२४ ०१
ततुरिर् वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।
वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम् ॥ ६ ०२४ ०२
अक्षो न चक्र्योः शूर बृहन् प्र ते मह्ना रिरिचे रोदस्योः ।
वृक्षस्य नु ते पुरुहूत वया व्य् ऊ३तयो रुरुहुर् इन्द्र पूर्वीः ॥ ६ ०२४ ०३
शचीवतस् ते पुरुशाक शाका गवाम् इव स्रुतयः संचरणीः ।
वत्सानां न तन्तयस् त इन्द्र दामन्वन्तो अदामानः सुदामन् ॥ ६ ०२४ ०४
अन्यद् अद्य कर्वरम् अन्यद् उ श्वो ऽसच् च सन् मुहुर् आचक्रिर् इन्द्रः ।
मित्रो नो अत्र वरुणश् च पूषार्यो वशस्य पर्येतास्ति ॥ ६ ०२४ ०५
वि त्वद् आपो न पर्वतस्य पृष्ठाद् उक्थेभिर् इन्द्रानयन्त यज्ञैः ।
तं त्वाभिः सुष्टुतिभिर् वाजयन्त आजिं न जग्मुर् गिर्वाहो अश्वाः ॥ ६ ०२४ ०६
न यं जरन्ति शरदो न मासा न द्याव इन्द्रम् अवकर्शयन्ति ।
वृद्धस्य चिद् वर्धताम् अस्य तनू स्तोमेभिर् उक्थैश् च शस्यमाना ॥ ६ ०२४ ०७
न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।
अज्रा इन्द्रस्य गिरयश् चिद् ऋष्वा गम्भीरे चिद् भवति गाधम् अस्मै ॥ ६ ०२४ ०८
गम्भीरेण न उरुणामत्रिन् प्रेषो यन्धि सुतपावन् वाजान् ।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्न् अक्तोर् व्युष्टौ परितक्म्यायाम् ॥ ६ ०२४ ०९
सचस्व नायम् अवसे अभीक इतो वा तम् इन्द्र पाहि रिषः ।
अमा चैनम् अरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥ ६ ०२४ १०

(४६६)
या त ऊतिर् अवमा या परमा या मध्यमेन्द्र शुष्मिन्न् अस्ति ।
ताभिर् ऊ षु वृत्रहत्ये ऽवीर् न एभिश् च वाजैर् महान् न उग्र ॥ ६ ०२५ ०१
आभि स्पृधो मिथतीर् अरिषण्यन्न् अमित्रस्य व्यथया मन्युम् इन्द्र ।
आभिर् विश्वा अभियुजो विषूचीर् आर्याय विशो ऽव तारीर् दासीः ॥ ६ ०२५ ०२
इन्द्र जामय उत ये ऽजामयो ऽर्वाचीनासो वनुषो युयुज्रे ।
त्वम् एषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः ॥ ६ ०२५ ०३
शूरो वा शूरं वनते शरीरैस् तनूरुचा तरुषि यत् कृण्वैते ।
तोके वा गोषु तनये यद् अप्सु वि क्रन्दसी उर्वरासु ब्रवैते ॥ ६ ०२५ ०४
नहि त्वा शूरो न तुरो न धृष्णुर् न त्वा योधो मन्यमानो युयोध ।
इन्द्र नकिष् ट्वा प्रत्य् अस्त्य् एषां विश्वा जातान्य् अभ्य् असि तानि ॥ ६ ०२५ ०५
स पत्यत उभयोर् नृम्णम् अयोर् यदी वेधसः समिथे हवन्ते ।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते ॥ ६ ०२५ ०६
अध स्मा ते चर्षणयो यद् एजान् इन्द्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ॥ ६ ०२५ ०७
अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वम् अनु वृत्रहत्ये ।
अनु क्षत्रम् अनु सहो यजत्रेन्द्र देवेभिर् अनु ते नृषह्ये ॥ ६ ०२५ ०८
एवा न स्पृधः सम् अजा समत्स्व् इन्द्र रारन्धि मिथतीर् अदेवीः ।
विद्याम वस्तोर् अवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ॥ ६ ०२५ ०९

(४६७)
श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।
सं यद् विशो ऽयन्त शूरसाता उग्रं नो ऽवः पार्ये अहन् दाः ॥ ६ ०२६ ०१
त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।
त्वां वृत्रेष्व् इन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥ ६ ०२६ ०२
त्वं कविं चोदयो ऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।
त्वं शिरो अमर्मणः पराहन्न् अतिथिग्वाय शंस्यं करिष्यन् ॥ ६ ०२६ ०३

त्वं रथम् प्र भरो योधम् ऋष्वम् आवो युध्यन्तं वृषभं दशद्युम् ।
त्वं तुग्रं वेतसवे सचाहन् त्वं तुजिं गृणन्तम् इन्द्र तूतोः ॥ ६ ०२६ ०४
त्वं तद् उक्थम् इन्द्र बर्हणा कः प्र यच् छता सहस्रा शूर दर्षि ।
अव गिरेर् दासं शम्बरं हन् प्रावो दिवोदासं चित्राभिर् ऊती ॥ ६ ०२६ ०५
त्वं श्रद्धाभिर् मन्दसानः सोमैर् दभीतये चुमुरिम् इन्द्र सिष्वप् ।
त्वं रजिम् पिठीनसे दशस्यन् षष्टिं सहस्रा शच्या सचाहन् ॥ ६ ०२६ ०६
अहं चन तत् सूरिभिर् आनश्यां तव ज्याय इन्द्र सुम्नम् ओजः ।
त्वया यत् स्तवन्ते सधवीर वीरास् त्रिवरूथेन नहुषा शविष्ठ ॥ ६ ०२६ ०७
वयं ते अस्याम् इन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः ।
प्रातर्दनिः क्षत्रश्रीर् अस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम् ॥ ६ ०२६ ०८

(४६८)
किम् अस्य मदे किम् व् अस्य पीताव् इन्द्रः किम् अस्य सख्ये चकार ।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किम् उ नूतनासः ॥ ६ ०२७ ०१
सद् अस्य मदे सद् व् अस्य पीताव् इन्द्रः सद् अस्य सख्ये चकार ।
रणा वा ये निषदि सत् ते अस्य पुरा विविद्रे सद् उ नूतनासः ॥ ६ ०२७ ०२
नहि नु ते महिमनः समस्य न मघवन् मघवत्त्वस्य विद्म ।
न राधसो-राधसो नूतनस्येन्द्र नकिर् ददृश इन्द्रियं ते ॥ ६ ०२७ ०३
एतत् त्यत् त इन्द्रियम् अचेति येनावधीर् वरशिखस्य शेषः ।
वज्रस्य यत् ते निहतस्य शुष्मात् स्वनाच् चिद् इन्द्र परमो ददार ॥ ६ ०२७ ०४
वधीद् इन्द्रो वरशिखस्य शेषो ऽभ्यावर्तिने चायमानाय शिक्षन् ।
वृचीवतो यद् धरियूपीयायां हन् पूर्वे अर्धे भियसापरो दर्त् ॥ ६ ०२७ ०५
त्रिंशच्छतं वर्मिण इन्द्र साकं यव्यावत्याम् पुरुहूत श्रवस्या ।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्य् आयन् ॥ ६ ०२७ ०६
यस्य गावाव् अरुषा सूयवस्यू अन्तर् ऊ षु चरतो रेरिहाणा ।
स सृञ्जयाय तुर्वशम् परादाद् वृचीवतो दैववाताय शिक्षन् ॥ ६ ०२७ ०७
द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।

अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ॥ ६ ०२७ ०८

(४६९)
आ गावो अग्मन्न् उत भद्रम् अक्रन् सीदन्तु गोष्ठे रणयन्त्व् अस्मे ।
प्रजावतीः पुरुरूपा इह स्युर् इन्द्राय पूर्वीर् उषसो दुहानाः ॥ ६ ०२८ ०१
इन्द्रो यज्वने पृणते च शिक्षत्य् उपेद् ददाति न स्वम् मुषायति ।
भूयो-भूयो रयिम् इद् अस्य वर्धयन्न् अभिन्ने खिल्ये नि दधाति देवयुम् ॥ ६ ०२८ ०२
न ता नशन्ति न दभाति तस्करो नासाम् आमित्रो व्यथिर् आ दधर्षति ।
देवांश् च याभिर् यजते ददाति च ज्योग् इत् ताभिः सचते गोपतिः सह ॥ ६ ०२८ ०३
न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रम् उप यन्ति ता अभि ।
उरुगायम् अभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥ ६ ०२८ ०४
गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामीद् धृदा मनसा चिद् इन्द्रम् ॥ ६ ०२८ ०५
यूयं गावो मेदयथा कृशं चिद् अश्रीरं चित् कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ॥ ६ ०२८ ०६
प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥ ६ ०२८ ०७
उपेदम् उपपर्चनम् आसु गोषूप पृच्यताम् ।
उप ऋषभस्य रेतस्य् उपेन्द्र तव वीर्ये ॥ ६ ०२८ ०८

(४७०)
इन्द्रं वो नरः सख्याय सेपुर् महो यन्तः सुमतये चकानाः ।
महो हि दाता वज्रहस्तो अस्ति महाम् उ रण्वम् अवसे यजध्वम् ॥ ६ ०२९ ०१
आ यस्मिन् हस्ते नर्या मिमिक्षुर् आ रथे हिरण्यये रथेष्ठाः ।
आ रश्मयो गभस्त्यो स्थूरयोर् आध्वन्न् अश्वासो वृषणो युजानाः ॥ ६ ०२९ ०२
श्रिये ते पादा दुव आ मिमिक्षुर् धृष्णुर् वज्री शवसा दक्षिणावान् ।

वसानो अत्कं सुरभिं दृशे कं स्व१र् ण नृतव् इषिरो बभूथ ॥ ६ ०२९ ०३
स सोम आमिश्लतमः सुतो भूद् यस्मिन् पक्तिः पच्यते सन्ति धानाः ।
इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः ॥ ६ ०२९ ०४
न ते अन्तः शवसो धाय्य् अस्य वि तु बाबधे रोदसी महित्वा ।
आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती ॥ ६ ०२९ ०५
एवेद् इन्द्रः सुहव ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा ।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥ ६ ०२९ ०६

(४७१)

भूय इद् वावृधे वीर्याय एको अजुर्यो दयते वसूनि ।
प्र रिरिचे दिव इन्द्रः पृथिव्या अर्धम् इद् अस्य प्रति रोदसी उभे ॥ ६ ०३० ०१
अधा मन्ये बृहद् असुर्यम् अस्य यानि दाधार नकिर् आ मिनाति ।
दिवे-दिवे सूर्यो दर्शतो भूद् वि सद्मान्य् उर्विया सुक्रतुर् धात् ॥ ६ ०३० ०२
अद्या चिन् नू चित् तद् अपो नदीनां यद् आभ्यो अरदो गातुम् इन्द्र ।
नि पर्वता अद्मसदो न सेदुस् त्वया दृळ्हानि सुक्रतो रजांसि ॥ ६ ०३० ०३
सत्यम् इत् तन् न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान् ।
अहन्न् अहिम् परिशयानम् अर्णो ऽवासृजो अपो अच्छा समुद्रम् ॥ ६ ०३० ०४
त्वम् अपो वि दुरो विषूचीर् इन्द्र दृळ्हम् अरुजः पर्वतस्य ।
राजाभवो जगतश् चर्षणीनां साकं सूर्यं जनयन् द्याम् उषासम् ॥ ६ ०३० ०५

(४७२)

अभूर् एको रयिपते रयीणाम् आ हस्तयोर् अधिथा इन्द्र कृष्टीः ।
वि तोके अप्सु तनये च सूरे ऽवोचन्त चर्षणयो विवाचः ॥ ६ ०३१ ०१
त्वद् भियेन्द्र पार्थिवानि विश्वाच्युता चिच् च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हम् भयते अज्मन्न् आ ते ॥ ६ ०३१ ०२
त्वं कुत्सेनाभि शुष्णम् इन्द्राशुषं युध्य कुयवं गविष्टौ ।

दर्श प्रपित्वे अध सूर्यस्य मुषायश् चक्रम् अविवे रपांसि ॥ ६ ०३१ ०३
त्वं शतान्य् अव शम्बरस्य पुरो जघन्थाप्रतीनि दस्योः ।
अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥ ।
स सत्यसत्वन् महते रणाय रथम् आ तिष्ठ तुविनृम्ण भीमम् ।
याहि प्रपथिन्न् अवसोप मद्रिक् प्र च श्रुत श्रावय चर्षणिभ्यः ॥ ६ ०३१ ०५

(४७३)
अपूर्व्या पुरुतमान्य् अस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्य् आसा स्थविराय तक्षम् ॥ ६ ०३२ ०१
स मातरा सूर्येणा कवीनाम् अवासयद् रुजद् अद्रिं गृणानः ।
स्वाधीभिर् ऋक्वभिर् वावशान उद् उस्रियाणाम् असृजन् निदानम् ॥ ६ ०३२ ०२
स वह्निभिर् ऋक्वभिर् गोषु शश्वन् मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन् दृळ्हा रुरोज कविभिः कविः सन् ॥ ६ ०३२ ०३
स नीव्याभिर् जरितारम् अच्छा महो वाजेभिर् महद्भिश् च शुष्मैः ।
पुरुवीराभिर् वृषभ क्षितीनाम् आ गिर्वणः सुविताय प्र याहि ॥ ६ ०३२ ०४
स सर्गेण शवसा तक्तो अत्यैर् अप इन्द्रो दक्षिणतस् तुराषाट् ।
इत्था सृजाना अनपावृद् अर्थं दिवे-दिवे विविषुर् अप्रमृष्यम् ॥ ६ ०३२ ०५

(४७४)
य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन् स्वभिष्टिर् दास्वान् ।
सौवश्व्यं यो वनवत् स्वश्वो वृत्रा समत्सु सासहद् अमित्रान् ॥ ६ ०३३ ०१
त्वां ही ३ न्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ ।
त्वं विप्रेभिर् वि पणीर् अशायस् त्वोत इत् सनिता वाजम् अर्वा ॥ ६ ०३३ ०२
त्वं ताँ इन्द्रोभयाँ अमित्रान् दासा वृत्राण्य् आर्या च शूर ।
वधीर् वनेव सुधितेभिर् अत्कैर् आ पृत्सु दर्षि नृणां नृतम ॥ ६ ०३३ ०३
स त्वं न इन्द्राकवाभिर् ऊती सखा विश्वायुर् अविता वृधे भूः ।
स्वर्षाता यद् ध्वयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ॥ ६ ०३३ ०४

नूनं न इन्द्रापराय च स्या भवा मृळीक उत नो अभिष्टौ ।
इत्था गृणन्तो महिनस्य शर्मन् दिवि ष्याम पार्ये गोषतमाः ॥ ६ ०३३ ०५

(४७५)
सं च त्वे जग्मुर् गिर इन्द्र पूर्वीर् वि च त्वद् यन्ति विभ्वो मनीषाः ।
पुरा नूनं च स्तुतय ऋषीणाम् पस्पृध्र इन्द्रे अध्य् उक्थार्का ॥ ६ ०३४ ०१
पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ।
रथो न महे शवसे युजानो ऽस्माभिर् इन्द्रो अनुमाद्यो भूत् ॥ ६ ०३४ ०२
न यं हिंसन्ति धीतयो न वाणीर् इन्द्रं नक्षन्तीद् अभि वर्धयन्तीः ।
यदि स्तोतारः शतं यत् सहस्रं गृणन्ति गिर्वणसं शं तद् अस्मै ॥ ६ ०३४ ०३
अस्मा एतद् दिव्य् अ १ र्चेव मासा मिमिक्ष इन्द्रे न्य् अयामि सोमः ।
जनं न धन्वन्न् अभि सं यद् आपः सत्रा वावृधुर् हवनानि यज्ञैः ॥ ६ ०३४ ०४
अस्मा एतन् मह्य् आङ्गूषम् अस्मा इन्द्राय स्तोत्रम् मतिभिर् अवाचि ।
असद् यथा महति वृत्रतूर्य इन्द्रो विश्वायुर् अविता वृधश् च ॥ ६ ०३४ ०५

(४७६)
कदा भुवन् रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः ।
कदा स्तोमं वासयो ऽस्य राया कदा धियः करसि वाजरत्नाः ॥ ६ ०३५ ०१
कर्हि स्वित् तद् इन्द्र यन् नृभिर् नॄन् वीरैर् वीरान् नीळयासे जयाजीन् ।
त्रिधातु गा अधि जयासि गोष्व् इन्द्र द्युम्नं स्वर्वद् धेह्य् अस्मे ॥ ६ ०३५ ०२
कर्हि स्वित् तद् इन्द्र यज् जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ ।
कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥ ६ ०३५ ०३
स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः ।
पीपिहीषः सुदुघाम् इन्द्र धेनुम् भरद्वाजेषु सुरुचो रुरुच्याः ॥ ६ ०३५ ०४
तम् आ नूनं वृजनम् अन्यथा चिच् छूरो यच् छक्र वि दुरो गृणीषे ।
मा निर् अरं शुक्रदुघस्य धेनोर् आङ्गिरसान् ब्रह्मणा विप्र जिन्व ॥ ६ ०३५ ०५

(४७७)
सत्रा मदासस् तव विश्वजन्याः सत्रा रायो ऽध ये पार्थिवासः ।
सत्रा वाजानाम् अभवो विभक्ता यद् देवेषु धारयथा असुर्यम् ॥ ६ ०३६ ०१
अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधये ऽर्वते च क्रतुं वृञ्जन्त्य् अपि वृत्रहत्ये ॥ ६ ०३६ ०२
तं सध्रीचीर् ऊतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुर् इन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ॥ ६ ०३६ ०३
स रायस् खाम् उप सृजा गृणानः पुरुश्चन्द्रस्य त्वम् इन्द्र वस्वः ।
पतिर् बभूथासमो जनानाम् एको विश्वस्य भुवनस्य राजा ॥ ६ ०३६ ०४
स तु श्रुधि श्रुत्या यो दुवोयुर् द्यौर् न भूमाभि रायो अर्यः ।
असो यथा नः शवसा चकानो युगे-युगे वयसा चेकितानः ॥ ६ ०३६ ०५

(४७८)
अर्वाग् रथं विश्ववारं त उग्रेन्द्र युक्तासो हरयो वहन्तु ।
कीरिश् चिद् धि त्वा हवते स्वर्वान् ऋधीमहि सधमादस् ते अद्य ॥ ६ ०३७ ०१
प्रो द्रोणे हरयः कर्माग्मन् पुनानास ऋज्यन्तो अभूवन् ।
इन्द्रो नो अस्य पूर्व्यः पपीयाद् द्युक्षो मदस्य सोम्यस्य राजा ॥ ६ ०३७ ०२
आसस्राणासः शवसानम् अच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः ।
अभि श्रव ऋज्यन्तो वहेयुर् नू चिन् नु वायोर् अमृतं वि दस्येत् ॥ ६ ०३७ ०३
वरिष्ठो अस्य दक्षिणाम् इयर्तीन्द्रो मघोनां तुविकूर्मितमः ।
यया वज्रिवः परियास्य् अंहो मघा च धृष्णो दयसे वि सूरीन् ॥ ६ ०३७ ०४
इन्द्रो वाजस्य स्थविरस्य दातेन्द्रो गीर्भिर् वर्धतां वृद्धमहाः ।
इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥ ६ ०३७ ०५

(४७९)
अपाद् इत उद् उ नश् चित्रतमो महीम् भर्षद् द्युमतीम् इन्द्रहूतिम् ।
पन्यसीं धीतिं दैव्यस्य यामञ् जनस्य रातिं वनते सुदानुः ॥ ६ ०३८ ०१
दूराच् चिद् आ वसतो अस्य कर्णा घोषाद् इन्द्रस्य तन्यति ब्रुवाणः ।
एयम् एनं देवहूतिर् ववृत्यान् मद्र्य१ग् इन्द्रम् इयम् ऋच्यमाना ॥ ६ ०३८ ०२
तं वो धिया परमया पुराजाम् अजरम् इन्द्रम् अभ्य् अनूष्य् अर्कैः ।
ब्रह्मा च गिरो दधिरे सम् अस्मिन् महांश् च स्तोमो अधि वर्धद् इन्द्रे ॥ ६ ०३८ ०३
वर्धाद् यं यज्ञ उत सोम इन्द्रं वर्धाद् ब्रह्म गिर उक्था च मन्म ।
वर्धाहैनम् उषसो यामन्न् अक्तोर् वर्धान् मासाः शरदो द्याव इन्द्रम् ॥ ६ ०३८ ०४
एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय ।
महाम् उग्रम् अवसे विप्र नूनम् आ विवासेम वृत्रतूर्येषु ॥ ६ ०३८ ०५

(४८०)
मन्द्रस्य कवेर् दिव्यस्य वह्नेर् विप्रमन्मनो वचनस्य मध्वः ।
अपा नस् तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः ॥ ६ ०३९ ०१
अयम् उशानः पर्य् अद्रिम् उस्रा ऋतधीतिभिर् ऋतयुग् युजानः ।
रुजद् अरुग्णं वि वलस्य सानुम् पणीँर् वचोभिर् अभि योधद् इन्द्रः ॥ ६ ०३९ ०२
अयं द्योतयद् अद्युतो व्य् अ१क्तून् दोषा वस्तोः शरद इन्दुर् इन्द्र ।
इमं केतुम् अदधुर् नू चिद् अह्नां शुचिजन्मन उषसश् चकार ॥ ६ ०३९ ०३
अयं रोचयद् अरुचो रुचानो ऽयं वासयद् व्य् ऋ१तेन पूर्वीः ।
अयम् ईयत ऋतयुग्भिर् अश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥ ६ ०३९ ०४
नू गृणानो गृणते प्रत्न राजन्न् इषः पिन्व वसुदेयाय पूर्वीः ।
अप ओषधीर् अविषा वनानि गा अर्वतो नॄन् ऋचसे रिरीहि ॥ ६ ०३९ ०५

(४८१)
इन्द्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखाया ।

उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः ॥ ६ ०४० ०१
अस्य पिब यस्य जज्ञान इन्द्र मदाय क्रत्वे अपिबो विरप्शिन् ।
तम् उ ते गावो नर आपो अद्रिर् इन्दुं सम् अह्यन् पीतये सम् अस्मै ॥ ६ ०४० ०२
समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः ।
त्वायता मनसा जोहवीमीन्द्रा याहि सुविताय महे नः ॥ ६ ०४० ०३
आ याहि शश्वद् उशता ययाथेन्द्र महा मनसा सोमपेयम् ।
उप ब्रह्माणि शृणव इमा नो ऽथा ते यज्ञस् तन्वे वयो धात् ॥ ६ ०४० ०४
यद् इन्द्र दिवि पार्ये यद् ऋधग् यद् वा स्वे सदने यत्र वासि ।
अतो नो यज्ञम् अवसे नियुत्वान् सजोषाः पाहि गिर्वणो मरुद्भिः ॥ ६ ०४० ०५

(४८२)
अहेळमान उप याहि यज्ञं तुभ्यम् पवन्त इन्दवः सुतासः ।
गावो न वज्रिन् स्वम् ओको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥ ६ ०४१ ०१
या ते काकुत् सुकृता या वरिष्ठा यया शश्वत् पिबसि मध्व ऊर्मिम् ।
तया पाहि प्र ते अध्वर्युर् अस्थात् सं ते वज्रो वर्तताम् इन्द्र गव्युः ॥ ६ ०४१ ०२
एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे सम् अकारि सोमः ।
एतम् पिब हरिव स्थातर् उग्र यस्येशिषे प्रदिवि यस् ते अन्नम् ॥ ६ ०४१ ०३
सुतः सोमो असुताद् इन्द्र वस्यान् अयं श्रेयाञ् चिकितुषे रणाय ।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास् तविषीर् आ पृणस्व ॥ ६ ०४१ ०४
ह्वयामसि त्वेन्द्र याह्य अर्वाङ् अरं ते सोमस् तन्वे भवाति ।
शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ॥ ६ ०४१ ०५

(४८३)
प्रत्य् अस्मै पिपीषते विश्वानि विदुषे भर ।
अरंगमाय जग्मये ऽपश्चाद्दघ्वने नरे ॥ ६ ०४२ ०१
एम् एनम् प्रत्येतन सोमेभिः सोमपातमम् ।

अमत्रेभिर् ऋजीषिणम् इन्द्रं सुतेभिर् इन्दुभिः ॥ ६ ०४२ ०२
यदी सुतेभिर् इन्दुभिः सोमेभिः प्रतिभूषथ ।
वेदा विश्वस्य मेधिरो धृषत् तं-तम् इद् एषते ॥ ६ ०४२ ०३
अस्मा-अस्मा इद् अन्धसो ऽध्वर्यो प्र भरा सुतम् ।
कुवित् समस्य जेन्यस्य शर्धतो ऽभिशस्तेर् अवस्परत् ॥ ६ ०४२ ०४

(४८४)
यस्य त्यच् छम्बरम् मदे दिवोदासाय रन्धयः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ ६ ०४३ ०१
यस्य तीव्रसुतम् मदम् मध्यम् अन्तं च रक्षसे ।
अयं स सोम इन्द्र ते सुतः पिब ॥ ६ ०४३ ०२
यस्य गा अन्तर् अश्मनो मदे दृळ्हा अवासृजः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ ६ ०४३ ०३
यस्य मन्दानो अन्धसो माघोनं दधिषे शवः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ ६ ०४३ ०४

(४८५)
यो रयिवो रयिंतमो यो द्युम्नैर् द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः ॥ ६ ०४४ ०१
यः शग्मस् तुविशग्म ते रायो दामा मतीनाम् ।
सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः ॥ ६ ०४४ ०२
येन वृद्धो न शवसा तुरो न स्वाभिर् ऊतिभिः ।
सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः ॥ ६ ०४४ ०३
त्यम् उ वो अप्रहणं गृणीषे शवसस् पतिम् ।
इन्द्रं विश्वासाहं नरम् मंहिष्ठं विश्वचर्षणिम् ॥ ६ ०४४ ०४
यं वर्धयन्तीद् गिरः पतिं तुरस्य राधसः ।

तम् इन् न्व् अस्य रोदसी देवी शुष्मं सपर्यतः ॥ ६ ०४४ ०५
तद् व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि ।
विपो न यस्योतयो वि यद् रोहन्ति सक्षितः ॥ ६ ०४४ ०६
अविदद् दक्षम् मित्रो नवीयान् पपानो देवेभ्यो वस्यो अचैत् ।
ससवान् स्तौलाभिर् धौतरीभिर् उरुष्या पायुर् अभवत् सखिभ्यः ॥ ६ ०४४ ०७
ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभिर् वपुर् दृशये वेन्यो व्य् आवः ॥ ६ ०४४ ०८
द्युमत्तमं दक्षं धेह्य् अस्मे सेधा जनानाम् पूर्वीर् अरातीः ।
वर्षीयो वयः कृणुहि शचीभिर् धनस्य सातव् अस्माꣳ अविड्ढि ॥ ६ ०४४ ०९
इन्द्र तुभ्यम् इन् मघवन्न् अभूम वयं दात्रे हरिवो मा वि वेनः ।
नकिर् आपिर् ददृशे मर्त्यत्रा किम् अङ्ग रध्रचोदनं त्वाहुः ॥ ६ ०४४ १०
मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।
पूर्वीष् ट इन्द्र निष्षिधो जनेषु जह्य् असुष्वीन् प्र वृहापृणतः ॥ ६ ०४४ ११
उद् अभ्राणीव स्तनयन्न् इयर्तीन्द्रो राधांस्य् अश्व्यानि गव्या ।
त्वम् असि प्रदिवः कारुधाया मा त्वादामान आ दभन् मघोनः ॥ ६ ०४४ १२
अध्वर्यो वीर प्र महे सुतानाम् इन्द्राय भर स ह्य् अस्य राजा ।
यः पूर्व्याभिर् उत नूतनाभिर् गीर्भिर् वावृधे गृणताम् ऋषीणाम् ॥ ६ ०४४ १३
अस्य मदे पुरु वर्पांसि विद्वान् इन्द्रो वृत्राण्य् अप्रती जघान ।
तम् उ प्र होषि मधुमन्तम् अस्मै सोमं वीराय शिप्रिणे पिबध्यै ॥ ६ ०४४ १४
पाता सुतम् इन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः ।
गन्ता यज्ञम् परावतश् चिद् अच्छा वसुर् धीनाम् अविता कारुधायाः ॥ ६ ०४४ १५
इदं त्यत् पात्रम् इन्द्रपानम् इन्द्रस्य प्रियम् अमृतम् अपायि ।
मत्सद् यथा सौमनसाय देवं व्य् अ१स्मद् द्वेषो युयवद् व्य् अंहः ॥ ६ ०४४ १६
एना मन्दानो जहि शूर शत्रूञ् जामिम् अजामिम् मघवन्न् अमित्रान् ।
अभिषेणाꣳ अभ्य् आ३ देदिशानान् पराच इन्द्र प्र मृणा जही च ॥ ६ ०४४ १७
आसु ष्मा णो मघवन्न् इन्द्र पृत्स्व् अ१स्मभ्यम् महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन् कृणुहि स्मा नो अर्धम् ॥ ६ ०४४ १८
आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयो ऽत्याः ।

अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु ॥ ६ ०४४ १९
आ ते वृषन् वृषणो द्रोणम् अस्थुर् घृतप्रुषो नोर्मयो मदन्तः ।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् ॥ ६ ०४४ २०
वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभ स्तियानाम् ।
वृष्णे त इन्दुर् वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥ ६ ०४४ २१
अयं देवः सहसा जायमान इन्द्रेण युजा पणिम् अस्तभायत् ।
अयं स्वस्य पितुर् आयुधानीन्दुर् अमुष्णाद् अशिवस्य मायाः ॥ ६ ०४४ २२
अयम् अकृणोद् उषसः सुपत्नीर् अयं सूर्ये अदधाज् ज्योतिर् अन्तः ।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्दद् अमृतं निगूळ्हम् ॥ ६ ०४४ २३
अयं द्यावापृथिवी वि ष्कभायद् अयं रथम् अयुनक् सप्तरश्मिम् ।
अयं गोषु शच्या पक्वम् अन्तः सोमो दाधार दशयन्त्रम् उत्सम् ॥ ६ ०४४ २४

(४८६)
य आनयत् परावतः सुनीती तुर्वशं यदुम् ।
इन्द्रः स नो युवा सखा ॥ ६ ०४५ ०१
अविप्रे चिद् वयो दधद् अनाशुना चिद् अर्वता ।
इन्द्रो जेता हितं धनम् ॥ ६ ०४५ ०२
महीर् अस्य प्रणीतयः पूर्वीर् उत प्रशस्तयः ।
नास्य क्षीयन्त ऊतयः ॥ ६ ०४५ ०३
सखायो ब्रह्मवाहसे ऽर्चत प्र च गायत ।
स हि नः प्रमतिर् मही ॥ ६ ०४५ ०४
त्वम् एकस्य वृत्रहन्न् अविता द्वयोर् असि ।
उतेदृशे यथा वयम् ॥ ६ ०४५ ०५
नयसीद् व् अति द्विषः कृणोष्य् उक्थशंसिनः ।
नृभिः सुवीर उच्यसे ॥ ६ ०४५ ०६
ब्रह्माणम् ब्रह्मवाहसं गीर्भिः सखायम् ऋग्मियम् ।
गां न दोहसे हुवे ॥ ।

यस्य॒ विश्वा॑नि॒ हस्त॑योर् ऊ॒चुर् वसू॑नि॒ नि द्वि॒ता ।
वी॒रस्य॑ पृत॒नाषहः॑ ॥ ६ ०४५ ०८
वि दृ॒ळ्हानि॑ चिद् अद्रिवो॒ जना॑नां शचीपते ।
वृ॒ह मा॒या अ॑नानत ॥ ६ ०४५ ०९
तम् उ॑ त्वा सत्य सोमपा॒ इन्द्र॑ वाजानाम् पते ।
अहू॑महि श्रव॒स्यवः॑ ॥ ६ ०४५ १०
तम् उ॑ त्वा॒ यः पु॒रासि॑थ॒ यो वा॑ नू॒नं हि॒ते धने॑ ।
हव्य॒ः स श्रु॑धी॒ हव॑म् ॥ ६ ०४५ ११
धी॒भिर् अर्व॑द्भि॒र् अर्व॑तो॒ वाजाँ॑ इन्द्र श्र॒वाय्या॑न् ।
त्वया॑ जेष्म हि॒तं धन॑म् ॥ ६ ०४५ १२
अभू॑र् उ वीर गिर्वणो म॒हाँ॑ इन्द्र॒ धने॑ हि॒ते ।
भरे॑ वितन्त॒साय्यः॑ ॥ ६ ०४५ १३
या त॑ ऊ॒तिर् अ॑मित्रहन् म॒क्षूज॑वस्त॒मास॑ति ।
तया॑ नो हिनु॒ही रथ॑म् ॥ ६ ०४५ १४
स रथे॑न र॒थीत॑मो ऽ॒स्माके॑नाभि॒युग्व॑ना ।
जेषि॑ जिष्णो हि॒तं धन॑म् ॥ ६ ०४५ १५
य एक॒ इत् तम् उ॑ ष्टुहि कृष्टी॒नां विच॑र्षणिः ।
पति॑र् ज॒ज्ञे वृष॑क्रतुः ॥ ६ ०४५ १६
यो गृण॒ताम् इद् आसि॑था॒पिर् ऊ॒ती शि॒वः सखा॑ ।
स त्वं न॑ इन्द्र मृळय ॥ ६ ०४५ १७
धि॒ष्व वज्रं॒ गभ॑स्त्यो रक्षो॒हत्या॑य वज्रिवः ।
सा॒स॒ही॒ष्ठा अ॒भि स्पृधः॑ ॥ ६ ०४५ १८
प्र॒त्नं र॑यी॒णां यु॒जं सखा॑यं कीरि॒चोद॑नम् ।
ब्रह्म॑वाहस्तमं हु॒वे ॥ ६ ०४५ १९
स हि विश्वा॑नि॒ पार्थि॑वाँ॒ एको॒ वसू॑नि॒ पत्य॑ते ।
गिर्व॑णस्तमो॒ अध्रि॑गुः ॥ ६ ०४५ २०
स नो॑ नि॒युद्भि॒र् आ पृण॒ कामं॒ वाजे॑भिर् अ॒श्विभिः॑ ।
गोम॑द्भिर् गोपते धृ॒षत् ॥ ६ ०४५ २१

तद् वो गाय सुते सचा पुरुहूताय सत्वने ।
शं यद् गवे न शाकिने ॥ ६ ०४५ २२
न घा वसुर् नि यमते दानं वाजस्य गोमतः ।
यत् सीम् उप श्रवद् गिरः ॥ ६ ०४५ २३
कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।
शचीभिर् अप नो वरत् ॥ ६ ०४५ २४
इमा उ त्वा शतक्रतो ऽभि प्र णोनुवुर् गिरः ।
इन्द्र वत्सं न मातरः ॥ ६ ०४५ २५
दूणाशं सख्यं तव गौर् असि वीर गव्यते ।
अश्वो अश्वायते भव ॥ ६ ०४५ २६
स मन्दस्वा ह्य् अन्धसो राधसे तन्वा महे ।
न स्तोतारं निदे करः ॥ ६ ०४५ २७
इमा उ त्वा सुते-सुते नक्षन्ते गिर्वणो गिरः ।
वत्सं गावो न धेनवः ॥ ६ ०४५ २८
पुरूतमम् पुरूणां स्तोतॄणां विवाचि ।
वाजेभिर् वाजयताम् ॥ ६ ०४५ २९
अस्माकम् इन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः ।
अस्मान् राये महे हिनु ॥ ६ ०४५ ३०
अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्न् अस्थात् ।
उरुः कक्षो न गाङ्ग्यः ॥ ६ ०४५ ३१
यस्य वायोर् इव द्रवद् भद्रा रातिः सहस्रिणी ।
सद्यो दानाय मंहते ॥ ६ ०४५ ३२
तत् सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।
बृबुं सहस्रदातमं सूरिं सहस्रसातमम् ॥ ६ ०४५ ३३

(४८७)
त्वाम् इद् धि हवामहे साता वाजस्य कारवः ।

त्वां वृत्रेष्व् इन्द्र सत्पतिं नरस् त्वां काष्ठास्व् अर्वतः ॥ ६ ०४६ ०१
स त्वं नश् चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
गाम् अश्वं रथ्यम् इन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ६ ०४६ ०२
यः सत्राहा विचर्षणिर् इन्द्रं तं हूमहे वयम् ।
सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ ६ ०४६ ०३
बाधसे जनान् वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम ।
अस्माकम् बोध्य् अविता महाधने तनूष्व् अप्सु सूर्ये ॥ ६ ०४६ ०४
इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठम् पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥ ६ ०४६ ०५
त्वाम् उग्रम् अवसे चर्षणीसहं राजन् देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना वसो ऽमित्रान् सुषहान् कृधि ॥ ६ ०४६ ०६
यद् इन्द्र नाहुषीष्व् आँ ओजो नृम्णं च कृष्टिषु ।
यद् वा पञ्च क्षितीनां द्युम्नम् आ भर सत्रा विश्वानि पौंस्या ॥ ६ ०४६ ०७
यद् वा तृक्षौ मघवन् द्रुह्याव् आ जने यत् पूरौ कच् च वृष्ण्यम् ।
अस्मभ्यं तद् रिरीहि सं नृषाह्ये ऽमित्रान् पृत्सु तुर्वणे ॥ ६ ०४६ ०८
इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर् यच्छ मघवद्भ्यश् च मह्यं च यावया दिद्युम् एभ्यः ॥ ६ ०४६ ०९
ये गव्यता मनसा शत्रुम् आदभुर् अभिप्रघ्नन्ति धृष्णुया ।
अध स्मा नो मघवन्न् इन्द्र गिर्वणस् तनूपा अन्तमो भव ॥ ६ ०४६ १०
अध स्मा नो वृधे भवेन्द्र नायम् अवा युधि ।
यद् अन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस् तिग्ममूर्धानः ॥ ६ ०४६ ११
यत्र शूरासस् तन्वो वितन्वते प्रिया शर्म पितॄणाम् ।
अध स्मा यच्छ तन्वे ३ तने च छर्दिर् अचित्तं यावय द्वेषः ॥ ६ ०४६ १२
यद् इन्द्र सर्गे अर्वतश् चोदयासे महाधने ।
असमने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः ॥ ६ ०४६ १३
सिन्धूँर् इव प्रवण आशुया यतो यदि क्लोशम् अनु ष्वणि ।
आ ये वयो न वर्वृतत्य् आमिषि गृभीता बाह्वोर् गवि ॥ ६ ०४६ १४

(४८८)

स्वा॒दुष् कि॒लाय॒म् मधु॑माꣳ उ॒ताय॒ं ती॒व्रः कि॒लाय॒ं रस॑वाꣳ उ॒ताय॑म् ।
उ॒तो न्व् अ १॒ स्य प॑पि॒वांस॒म् इन्द्रं॒ न कश् च॒न स॑हत आह॒वेषु॑ ॥ ६ ०४७ ०१
अ॒यं स्वा॒दुर् इ॒ह मदि॑ष्ठ आस॒ यस्येन्द्रो॑ वृत्र॒हत्ये॑ म॒माद॑ ।
पु॒रूणि॒ यश् च्यौ॒त्ना शम्ब॑रस्य॒ वि न॑व॒तिं नव॑ च दे॒ह्यो॒ ३॑ हन् ॥ ६ ०४७ ०२
अ॒यम् मे॑ पी॒त उद् इ॑यर्ति॒ वाच॑म् अ॒यम् म॑नी॒षाम् उ॑श॒तीम् अ॑जीगः ।
अ॒यं षळ् उ॒र्वीर् अ॑मिमीत॒ धीरो॒ न याभ्यो॒ भुव॑नं॒ कच् च॒नारे ॥ ६ ०४७ ०३
अ॒यं स यो व॑रि॒माण॑म् पृथि॒व्या व॒र्ष्माण॑ं दि॒वो अकृ॑णोद् अ॒यं सः ।
अ॒यम् पी॒यूष॑ं ति॒सृषु॑ प्र॒वत्सु॒ सोमो॑ दाधारो॒र्व् अ १॒ न्तरि॑क्षम् ॥ ६ ०४७ ०४
अ॒यं वि॑दच् चित्र॒दृशी॑क॒म् अर्णः॑ शु॒क्रस॑द्मनाम् उ॒षसा॒म् अनी॑के ।
अ॒यम् म॒हान् म॑ह॒ता स्कम्भ॑नेनो॒द् द्याम् अ॑स्तभ्नाद् वृष॒भो म॒रुत्वा॑न् ॥ ६ ०४७ ०५
धृ॒षत् पि॑ब क॒लशे॒ सोम॑म् इन्द्र वृत्र॒हा शू॑र सम॒रे वसू॑नाम् ।
माध्यं॑दिने॒ सव॑न॒ आ वृ॑षस्व रयि॒स्थानो॑ र॒यिम् अ॒स्मासु॑ धेहि ॥ ६ ०४७ ०६
इन्द्र॒ प्र णः॑ पुरए॒तेव॑ पश्य॒ प्र नो॑ नय प्रत॒रं वस्यो॒ अच्छ॑ ।
भवा॑ सुपा॒रो अ॑तिपार॒यो नो॒ भवा॒ सुनी॑तिर् उ॒त वा॒मनी॑तिः ॥ ६ ०४७ ०७
उ॒रुं नो॑ लो॒कम् अनु॑ नेषि वि॒द्वान् स्व॑र्वज् ज्योति॒र् अभ॑यं स्व॒स्ति ।
ऋ॒ष्वा त॑ इन्द्र॒ स्थवि॑रस्य बा॒हू उप॑ स्थेयाम शर॒णा बृ॒हन्ता॑ ॥ ६ ०४७ ०८
वरि॑ष्ठे न इन्द्र व॒न्धुरे॑ धा॒ वहि॑ष्ठयोः शताव॒न्न् अश्व॑यो॒र् आ ।
इष॒म् आ व॑क्षी॒षां वर्षि॑ष्ठा॒म् मा न॑स् तारीन् मघव॒न् रायो॑ अ॒र्यः ॥ ६ ०४७ ०९
इन्द्र॑ मृ॒ळ मह्य॑ं जी॒वातु॑म् इच्छ चो॒दय॒ धिय॒म् अय॑सो॒ न धारा॑म् ।
यत् किं चा॒हं त्वा॒युर् इ॒दं वदा॑मि॒ तज् जु॑षस्व कृ॒धि मा॑ दे॒ववन्त॑म् ॥ ६ ०४७ १०
त्रा॒तार॒म् इन्द्र॑म् अवि॒तार॒म् इन्द्र॒ं हवे॑-हवे सु॒हव॒ं शूर॒म् इन्द्र॑म् ।
ह्वया॑मि श॒क्रम् पु॑रुहू॒तम् इन्द्र॑ं स्व॒स्ति नो॑ म॒घवा॑ धा॒त्व् इन्द्रः॑ ॥ ६ ०४७ ११
इन्द्रः॑ सु॒त्रामा॒ स्ववा॒ꣳ अवो॑भिः सुमृळी॒को भ॑वतु वि॒श्ववे॑दाः ।
बाध॑तां॒ द्वेषो॒ अभ॑यं कृणोतु सु॒वीर्य॑स्य॒ पत॑यः स्याम ॥ ६ ०४७ १२
तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म ।
स सु॒त्रामा॒ स्ववा॒ꣳ इन्द्रो॑ अ॒स्मे आ॒राच् चि॒द् द्वेषः॑ सनु॒तर् यु॑योतु ॥ ६ ०४७ १३

अव त्वे इन्द्र प्रवतो नोर्मिर् गिरो ब्रह्माणि नियुतो धवन्ते ।
उरू न राधः सवना पुरूण्य् अपो गा वज्रिन् युवसे सम् इन्दून् ॥ ६ ०४७ १४
क ईं स्तवत् कः पृणात् को यजाते यद् उग्रम् इन् मघवा विश्वहावेत् ।
पादाव् इव प्रहरन्न् अन्यम्-अन्यं कृणोति पूर्वम् अपरं शचीभिः ॥ ६ ०४७ १५
शृण्वे वीर उग्रम्-उग्रं दमायन्न् अन्यम्-अन्यम् अतिनेनीयमानः ।
एधमानद्विळ् उभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥ ६ ०४७ १६
परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिर् एति ।
अनानुभूतीर् अवधून्वानः पूर्वीर् इन्द्रः शरदस् तर्तरीति ॥ ६ ०४७ १७
रूपं-रूपम् प्रतिरूपो बभूव तद् अस्य रूपम् प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्य् अस्य हरयः शता दश ॥ ६ ०४७ १८
युजानो हरिता रथे भूरि त्वष्टेह राजति ।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥ ६ ०४७ १९
अगव्यूति क्षेत्रम् आगन्म देवा उर्वी सती भूमिर् अंहूरणाभूत् ।
बृहस्पते प्र चिकित्सा गविष्टाव् इत्था सते जरित्र इन्द्र पन्थाम् ॥ ६ ०४७ २०
दिवे-दिवे सदृशीर् अन्यम् अर्धं कृष्णा असेधद् अप सद्मनो जाः ।
अहन् दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च ॥ ६ ०४७ २१
प्रस्तोक इन् नु राधसस् त इन्द्र दश कोशयीर् दश वाजिनो ऽदात् ।
दिवोदासाद् अतिथिग्वस्य राधः शाम्बरं वसु प्रत्य् अग्रभीष्म ॥ ६ ०४७ २२
दशाश्वान् दश कोशान् दश वस्त्राधिभोजना ।
दशो हिरण्यपिण्डान् दिवोदासाद् असानिषम् ॥ ६ ०४७ २३
दश रथान् प्रष्टिमतः शतं गा अथर्वभ्यः ।
अश्वथः पायवे ऽदात् ॥ ६ ०४७ २४
महि राधो विश्वजन्यं दधानान् भरद्वाजान् सार्ञ्जयो अभ्य् अयष्ट ॥ ६ ०४७ २५
वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥ ६ ०४७ २६
दिवस् पृथिव्याः पर्य् ओज उद्भृतं वनस्पतिभ्यः पर्य् आभृतं सहः ।
अपाम् ओज्मानम् परि गोभिर् आवृतम् इन्द्रस्य वज्रं हविषा रथं यज ॥ ६ ०४७ २७
इन्द्रस्य वज्रो मरुताम् अनीकम् मित्रस्य गर्भो वरुणस्य नाभिः ।

सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ ६ ०४७ २८
उप श्वासय पृथिवीम् उत द्याम् पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूर् इन्द्रेण देवैर् दूराद् दवीयो अप सेध शत्रून् ॥ ६ ०४७ २९
आ क्रन्दय बलम् ओजो न आ धा नि ष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिर् असि वीळयस्व ॥ ६ ०४७ ३०
आमूर् अज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर् वावदीति ।
सम् अश्वपर्णाश् चरन्ति नो नरो ऽस्माकम् इन्द्र रथिनो जयन्तु ॥ ६ ०४७ ३१

(४८९)
यज्ञा-यज्ञा वो अग्नये गिरा-गिरा च दक्षसे ।
प्र-प्र वयम् अमृतं जातवेदसम् प्रियम् मित्रं न शंसिषम् ॥ ६ ०४८ ०१
ऊर्जो नपातं स हिनायम् अस्मयुर् दाशेम हव्यदातये ।
भुवद् वाजेष्व् अविता भुवद् वृध उत त्राता तनूनाम् ॥ ६ ०४८ ०२
वृषा ह्य् अग्ने अजरो महान् विभास्य् अर्चिषा ।
अजस्रेण शोचिषा शोशुचच् छुचे सुदीतिभिः सु दीदिहि ॥ ६ ०४८ ०३
महो देवान् यजसि यक्ष्य् आनुषक् तव क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्य् अग्ने ऽवसे रास्व वाजोत वंस्व ॥ ६ ०४८ ०४
यम् आपो अद्रयो वना गर्भम् ऋतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ॥ ६ ०४८ ०५
आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस् तमो ददृश ऊर्म्यास्व् आ श्यावास्व् अरुषो वृषा श्यावा अरुषो वृषा ॥ ६
०४८ ०६
बृहद्भिर् अग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन् नः शुक्र दीदिहि द्युमत् पावक दीदिहि ॥ ६ ०४८
०७
विश्वासां गृहपतिर् विशाम् असि त्वम् अग्ने मानुषीणाम् ।
शतम् पूर्भिर् यविष्ठ पाह्य् अंहसः समेद्धारं शतं हिमा स्तोतृभ्यो ये च ददति ॥ ६

०४८ ०८
त्वं न॑श् चि॒त्र ऊ॒त्या वसो॒ राधां॑सि चोदय ।
अ॒स्य रा॒यस् त्वम् अ॑ग्ने र॒थीर् अ॑सि वि॒दा गा॒धं तु॒चे तु नः॑ ॥ ६ ०४८ ०९
पर्षि॑ तो॒कं तन॑यम् प॒र्तृभि॑ष् ट्वम् अद॑ब्धै॒र् अप्र॑युत्वभिः ।
अग्ने॒ हेळां॑सि॒ दैव्या॑ युयोधि॒ नो ऽदे॑वानि॒ ह्वरां॑सि च ॥ ६ ०४८ १०
आ स॑खायः सब॒र्दुघां॑ धे॒नुम् अ॑जध्व॒म् उप॒ नव्य॑सा॒ वचः॑ ।
सृ॒जध्व॒म् अन॑पस्फुराम् ॥ ६ ०४८ ११
या शर्धा॑य॒ मारु॑ताय॒ स्वभा॑नवे॒ श्रवो ऽमृ॑त्यु॒ धुक्ष॑त । ।
या मृ॑ळी॒के म॒रुतां॑ तु॒राणां॒ या सु॒म्नैर् ए॑व॒याव॑री ॥ ६ ०४८ १२
भ॒रद्वा॑जा॒याव॑ धुक्षत द्वि॒ता ।
धे॒नुं च॑ वि॒श्वदो॑ह॒सम् इषं॑ च वि॒श्वभो॑जसम् ॥ ६ ०४८ १३
तं व॒ इन्द्रं॒ न सु॒क्रतुं॒ वरु॑णम् इव मा॒यिन॑म् ।
अ॒र्य॒मणं॒ न म॒न्द्रं सृ॒प्रभो॑जसं॒ विष्णुं॒ न स्तु॑ष आ॒दिशे॑ ॥ ६ ०४८ १४
त्वे॒षं शर्धो॒ न मारु॑तं तुवि॒ष्वण्य् अ॑नर्वा॒णम् पू॒षणं॒ सं यथा॑ श॒ता ।
सं स॒हस्रा॒ कारि॑षच् च॒र्षणि॑भ्य॒ आँ आ॒विर् गू॒ळ्हा वसू॑ करत् सु॒वेदा॑ नो॒ वसू॑ करत् ॥
६ ०४८ १५
आ मा॑ पूष॒न्न् उप॑ द्रव॒ शंसि॑षं॒ नु ते॑ अपिक॒र्ण आ॑घृणे ।
अ॒घा अ॒र्यो अरा॑तयः ॥ ६ ०४८ १६
मा का॑क॒म्बीर॒म् उद् वृ॑हो॒ वन॒स्पति॒म् अश॑स्ती॒र् वि हि नीन॑शः ।
मोत सूरो॒ अह॑ ए॒वा च॒न ग्री॒वा आ॒दध॑ते॒ वेः ॥ ६ ०४८ १७
दृते॑र् इव ते ऽवृ॒कम् अ॑स्तु स॒ख्यम् ।
अच्छि॑द्रस्य दध॒न्वतः॒ सुपू॑र्णस्य दध॒न्वतः॑ ॥ ६ ०४८ १८
प॒रो हि मर्त्यै॒र् असि॑ स॒मो दे॒वैर् उ॒त श्रि॒या ।
अ॒भि ख्यः॑ पूष॒न् पृत॑नासु न॒स् त्वम् अवा॑ नू॒नं यथा॑ पु॒रा ॥ ६ ०४८ १९
वा॒मी वा॒मस्य॑ धूतयः॒ प्रणी॑तिर् अस्तु सू॒नृता॑ ।
दे॒वस्य॑ वा मरुतो॒ मर्त्य॑स्य वेजा॒नस्य॑ प्रयज्यवः ॥ ६ ०४८ २०
स॒द्यश् चि॒द् यस्य॑ चर्कृ॒तिः परि॒ द्यां दे॒वो नैति॒ सूर्यः॑ ।
त्वे॒षं शवो॑ दधिरे॒ नाम॑ य॒ज्ञिय॑म् म॒रुतो॑ वृत्र॒हं शवो॒ ज्येष्ठं॑ वृत्र॒हं शवः॑ ॥ ६ ०४८ २१

सकृद् ध द्यौर् अजायत सकृद् भूमिर् अजायत ।
पृश्न्या दुग्धं सकृत् पयस् तद् अन्यो नानु जायते ॥ ६ ०४८ २२

(४९०)
स्तुषे जनं सुव्रतं नव्यसीभिर् गीर्भिर् मित्रावरुणा सुम्नयन्ता ।
त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्निः ॥ ६ ०४९ ०१
विशो-विश ईड्यम् अध्वरेष्व् अदृप्तक्रतुम् अरतिं युवत्योः ।
दिवः शिशुं सहसः सूनुम् अग्निं यज्ञस्य केतुम् अरुषं यजध्यै ॥ ६ ०४९ ०२
अरुषस्य दुहितरा विरूपे स्तृभिर् अन्या पिपिशे सूरो अन्या ।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥ ६ ०४९ ०३
प्र वायुम् अच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविम् इयक्षसि प्रयज्यो ॥ ६ ०४९ ०४
स मे वपुश् छदयद् अश्विनोर् यो रथो विरुक्मान् मनसा युजानः ।
येन नरा नासत्येषयध्यै वर्तिर् याथस् तनयाय त्मने च ॥ ६ ०४९ ०५
पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतम् अप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर् जगत स्थातर् जगद् आ कृणुध्वम् ॥ ६ ०४९ ०६
पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिर् अच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ॥ ६ ०४९ ०७
पथस्-पथः परिपतिं वचस्या कामेन कृतो अभ्य् आनळ् अर्कम् ।
स नो रासच् छुरुधश् चन्द्राग्रा धियं-धियं सीषधाति प्र पूषा ॥ ६ ०४९ ०८
प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिम् ऋभ्वम् ।
होता यक्षद् यजतम् पस्त्यानाम् अग्निस् त्वष्टारं सुहवं विभावा ॥ ६ ०४९ ०९
भुवनस्य पितरं गीर्भिर् आभी रुद्रं दिवा वर्धया रुद्रम् अक्तौ ।
बृहन्तम् ऋष्वम् अजरं सुषुम्नम् ऋधग् घुवेम कविनेषितासः ॥ ६ ०४९ १०
आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद् धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत् ॥ ६ ०४९ ११
प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिर् अस्तम् ।

स पिस्पृशति तन्वै श्रुतस्य स्तृभिर् न नाकं वचनस्य विपः ॥ ६ ०४९ १२
यो रजांसि विममे पार्थिवानि त्रिश् चिद् विष्णुर् मनवे बाधिताय ।
तस्य ते शर्मन्न् उपदद्यमाने राया मदेम तन्वा३ तना च ॥ ६ ०४९ १३
तन् नो ऽहिर् बुध्न्यो अद्भिर् अर्कैस् तत् पर्वतस् तत् सविता चनो धात् ।
तद् ओषधीभिर् अभि रातिषाचो भगः पुरंधिर् जिन्वतु प्र राये ॥ ६ ०४९ १४
नु नो रयिं रथ्यं चर्षणिप्राम् पुरुवीरम् मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान् स्पृधो अदेवीर् अभि च क्रमाम विश आदेवीर् अभ्य् अ१श्नवाम ॥ ६ ०४९ १५

(४९१)
हुवे वो देवीम् अदितिं नमोभिर् मृळीकाय वरुणम् मित्रम् अग्निम् ।
अभिक्षदाम् अर्यमणं सुशेवं त्रातॄन् देवान् सवितारम् भगं च ॥ ६ ०५० ०१
सुज्योतिषः सूर्य दक्षपितॄन् अनागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥ ६ ०५० ०२
उत द्यावापृथिवी क्षत्रम् उरु बृहद् रोदसी शरणं सुषुम्ने ।
महस् करथो वरिवो यथा नो ऽस्मे क्षयाय धिषणे अनेहः ॥ ६ ०५० ०३
आ नो रुद्रस्य सूनवो नमन्ताम् अद्या हूतासो वसवो ऽधृष्टाः ।
यद् ईम् अर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥ ६ ०५० ०४
मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवम् मरुतो यद् ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥ ६ ०५० ०५
अभि त्यं वीरं गिर्वणसम् अर्चेन्द्रम् ब्रह्मणा जरितर् नवेन ।
श्रवद् इद् धवम् उप च स्तवानो रासद् वाजाँ उप महो गृणानः ॥ ६ ०५० ०६
ओमानम् आपो मानुषीर् अमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर् जगतो जनित्रीः ॥ ६ ०५० ०७
आ नो देवः सविता त्रायमाणो हिरण्यपाणिर् यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥ ६ ०५० ०८
उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्न् अध्वरे ववृत्याः ।

स्याम् अहं ते सदम् इद् रातौ तव स्याम् अग्ने ऽवसा सुवीरः ॥ ६ ०५० ०९
उत त्या मे हवम् आ जग्म्यातं नासत्या धीभिर् युवम् अङ्ग विप्रा ।
अत्रिं न महस् तमसो ऽमुमुक्तं तूर्वतं नरा दुरिताद् अभीके ॥ ६ ०५० १०
ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥ ६ ०५० ११
ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर् मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यताम् इषं नः ॥ ६ ०५० १२
उत स्य देवः सविता भगो नो ऽपां नपाद् अवतु दानु पप्रिः ।
त्वष्टा देवेभिर् जनिभिः सजोषा द्यौर् देवेभिः पृथिवी समुद्रैः ॥ ६ ०५० १३
उत नो ऽहिर् बुध्न्यः शृणोत्व् अज एकपात् पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥ ६ ०५० १४
एवा नपातो मम तस्य धीभिर् भरद्वाजा अभ्य् अर्चन्त्य् अर्कैः ।
ग्ना हुतासो वसवो ऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥ ६ ०५० १५

(४९२)
उद् उ त्यच् चक्षुर् महि मित्रयोर् आँ एति प्रियं वरुणयोर् अदब्धम् ।
ऋतस्य शुचि दर्शतम् अनीकं रुक्मो न दिव उदिता व्य् अद्यौत् ॥ ६ ०५१ ०१
वेद यस् त्रीणि विदथान्य् एषां देवानां जन्म सनुतर् आ च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्यन्न् अभि चष्टे सूरो अर्य एवान् ॥ ६ ०५१ ०२
स्तुष उ वो मह ऋतस्य गोपान् अदितिम् मित्रं वरुणं सुजातान् ।
अर्यमणम् भगम् अदब्धधीतीन् अच्छा वोचे सधन्यः पावकान् ॥ ६ ०५१ ०३
रिशादसः सत्पतीँर् अदब्धान् महो राज्ञः सुवसनस्य दातॄन् ।
यूनः सुक्षत्रान् क्षयतो दिवो नॄन् आदित्यान् याम्य् अदितिं दुवोयु ॥ ६ ०५१ ०४
द्यौ३ष् पितः पृथिवि मातर् अध्रुग् अग्ने भ्रातर् वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥ ६ ०५१ ०५
मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस् तनूनां यूयं दक्षस्य वचसो बभूव ॥ ६ ०५१ ०६

मा व एनो अन्यकृतम् भुजेम मा तत् कर्म वसवो यच् चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस् तन्वं रीरिषीष्ट ॥ ६ ०५१ ०७
नम इद् उग्रं नम आ विवासे नमो दाधार पृथिवीम् उत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिद् एनो नमसा विवासे ॥ ६ ०५१ ०८
ऋतस्य वो रथ्यः पूतदक्षान् ऋतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिर् उरुचक्षसो नॄन् विश्वान् व आ नमे महो यजत्राः ॥ ६ ०५१ ०९
ते हि श्रेष्ठवर्चसस् त उ नस् तिरो विश्वानि दुरिता नयन्ति ।
सुक्षत्रासो वरुणो मित्रो अग्निर् ऋतधीतयो वक्मराजसत्याः ॥ ६ ०५१ १०
ते न इन्द्रः पृथिवी क्षाम वर्धन् पूषा भगो अदितिः पञ्च जनाः ।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ॥ ६ ०५१ ११
नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर् यजमानो मियेधैर् देवानां जन्म वसूयुर् ववन्द ॥ ६ ०५१ १२
अप त्यं वृजिनं रिपुं स्तेनम् अग्ने दुराध्यम् ।
दविष्ठम् अस्य सत्पते कृधी सुगम् ॥ ६ ०५१ १३
ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।
जही न्य् अ १ त्रिणम् पणिं वृको हि षः ॥ ६ ०५१ १४
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।
कर्ता नो अध्वन्न् आ सुगं गोपा अमा ॥ ६ ०५१ १५
अपि पन्थाम् अगन्महि स्वस्तिगाम् अनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥ ६ ०५१ १६

(४९३)
न तद् दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिर् आभिः ।
उब्जन्तु तं सुभ्व १ : पर्वतासो नि हीयताम् अतियाजस्य यष्टा ॥ ६ ०५२ ०१
अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषम् अभि तं शोचतु द्यौः ॥ ६ ०५२ ०२
किम् अङ्ग त्वा ब्रह्मणः सोम गोपां किम् अङ्ग त्वाहुर् अभिशस्तिपां नः ।

किम् अ॒ङ्ग नः॑ पश्यसि नि॒द्यमा॑नान् ब्रह्म॒द्विषे॒ तपु॑षिं हे॒तिम् अ॑स्य ॥ ६ ०५२ ०३
अव॑न्तु॒ माम् उ॒षसो॒ जाय॑माना॒ अव॑न्तु॒ मा॒ सिन्ध॑व॒ः पिन्व॑मानाः ।
अव॑न्तु मा॒ पर्व॑तासो ध्रु॒वासो ऽव॑न्तु मा पि॒तरो॑ दे॒वहू॑तौ ॥ ६ ०५२ ०४
वि॒श्व॒दानीं॑ सु॒मन॑सः स्याम॒ पश्ये॑म॒ नु सूर्य॑म् उ॒च्चर॑न्तम् ।
तथा॑ कर॒द् वसु॑पति॒र् वसू॑नां दे॒वाँ ओहा॒नो ऽव॒साग॑मिष्ठः ॥ ६ ०५२ ०५
इन्द्रो॒ नेदि॑ष्ठम् अव॒साग॑मिष्ठ॒ः सर॑स्वती॒ सिन्धु॑भि॒ः पिन्व॑माना ।
प॒र्जन्यो॑ न॒ ओष॑धीभिर् मयो॒भुर् अ॒ग्निः सु॒शंसः॑ सु॒हवः॑ पि॒तेव॑ ॥ ६ ०५२ ०६
विश्वे॑ देवास॒ आ ग॑त शृणु॒ता म॑ इ॒मं हव॑म् ।
एदम् ब॒र्हिर् नि षी॑दत ॥ ६ ०५२ ०७
यो वो॑ देवा घृ॒तस्नु॑ना ह॒व्येन॑ प्रति॒भूष॑ति ।
तं विश्व॒ उप॑ गच्छथ ॥ ६ ०५२ ०८
उप॑ नः सू॒नवो॒ गिरः॑ शृ॒ण्वन्त्व् अ॒मृत॑स्य॒ ये ।
सु॒मृ॒ळीका भव॑न्तु नः ॥ ६ ०५२ ०९
विश्वे॑ दे॒वा ऋ॑ता॒वृध॑ ऋ॒तुभि॑र् हवन॒श्रुतः॑ ।
जु॒षन्ता॒ं युज्य॒म् पयः॑ ॥ ६ ०५२ १०
स्तो॒त्रम् इन्द्रो॑ म॒रुद्ग॑ण॒स् त्वष्टृ॑मान् मि॒त्रो अ॑र्य॒मा ।
इ॒मा ह॒व्या जु॑षन्त नः ॥ ६ ०५२ ११
इ॒मं नो॑ अग्ने अध्व॒रं होत॑र् वयुन॒शो य॑ज ।
चि॒कि॒त्वान् दैव्य॒ं जन॑म् ॥ ६ ०५२ १२
विश्वे॑ देवाः शृणु॒तेमं हव॑म् मे॒ ये अ॒न्तरि॑क्षे॒ य उप॒ द्यवि॒ ष्ठ ।
ये अ॑ग्निजि॒ह्वा उ॒त वा॒ यज॑त्रा आ॒सद्या॒स्मिन् ब॒र्हिषि॑ मादयध्वम् ॥ ६ ०५२ १३
विश्वे॑ दे॒वा मम॑ शृण्वन्तु य॒ज्ञिया॑ उ॒भे रोद॑सी अ॒पां नपा॑च् च॒ मन्म॑ ।
मा वो॒ वचां॑सि परि॒चक्ष्या॑णि वोचं सु॒म्नेष्व् इद् वो॒ अन्त॑मा मदेम ॥ ६ ०५२ १४
ये के च॒ ज्मा म॒हिनो॒ अहि॑माया दि॒वो ज॑ज्ञि॒रे अ॒पां स॒धस्थे॑ ।
ते अ॒स्मभ्य॑म् इ॒षये॒ विश्व॒म् आयुः॒ क्षप॑ उ॒स्रा व॑रिवस्यन्तु दे॒वाः ॥ ६ ०५२ १५
अग्नी॑पर्जन्या॒व् अव॑त॒ं धिय॑म् मे॒ ऽस्मिन् हवे॑ सुहवा सुष्टु॒तिं नः॑ ।
इळा॑म् अ॒न्यो ज॒नय॒द् गर्भ॑म् अ॒न्यः प्र॒जाव॑तीर् इष॒ आ ध॑त्तम् अ॒स्मे ॥ ६ ०५२ १६
स्ती॒र्णे ब॒र्हिषि॑ समिधा॒ने अ॒ग्नौ सू॒क्तेन॑ म॒हा नम॒सा वि॑वासे ।

अ॒स्मिन् नो॑ अ॒द्य वि॒दथे॑ यजत्रा॒ विश्वे॑ देवा ह॒विषि॑ मादयध्वम् ॥ ६ ०५२ १७

(४९४)
व॒यम् उ॑ त्वा पथस् पते॒ रथं॒ न वाज॑सातये ।
धि॒ये पू॑षन्न् अयुज्महि ॥ ६ ०५३ ०१
अ॒भि नो॒ नर्यं॒ वसु॑ वी॒रम् प्रय॑तदक्षिणम् ।
वा॒मं गृ॒हप॑तिं नय ॥ ६ ०५३ ०२
अदि॑त्सन्तं चिद् आघृणे॒ पूष॒न् दाना॑य चोदय ।
प॒णेश् चि॒द् वि म्र॑दा॒ मनः॑ ॥ ६ ०५३ ०३
वि प॒थो वाज॑सातये चिनु॒हि वि मृधो॑ जहि ।
साध॑न्ताम् उग्र नो॒ धियः॑ ॥ ६ ०५३ ०४
परि॑ तृन्धि पणी॒नाम् आर॑या॒ हृद॑या कवे ।
अथे॑म् अ॒स्मभ्यं॑ रन्धय ॥ ६ ०५३ ०५
वि पू॑ष॒न्न् आर॑या तुद प॒णेर् इ॑च्छ हृ॒दि प्रि॒यम् ।
अथे॑म् अ॒स्मभ्यं॑ रन्धय ॥ ६ ०५३ ०६
आ रि॑ख किकि॒रा कृ॑णु पणी॒नां हृद॑या कवे ।
अथे॑म् अ॒स्मभ्यं॑ रन्धय ॥ ६ ०५३ ०७
याम् पू॑षन् ब्रह्म॒चोद॑नी॒म् आरा॒म् बिभ॑र्ष्य् आघृणे ।
तया॑ सम॒स्य हृद॑यम् आ रि॑ख किकि॒रा कृ॑णु ॥ ६ ०५३ ०८
या ते॒ अष्ट्रा॒ गोओ॑प॒शाघृणे पशु॒साध॑नी ।
तस्या॑स् ते सु॒म्नम् ई॑महे ॥ ६ ०५३ ०९
उ॒त नो॑ गो॒षणिं॒ धिय॑म् अश्व॒सां वा॑ज॒साम् उ॒त ।
नृ॒वत् कृ॑णुहि वी॒तये॑ ॥ ६ ०५३ १०

(४९५)
सम् पू॑षन् वि॒दुषा॑ नय॒ यो अञ्ज॑सानु॒शास॑ति ।

य ए॒वेदम् इति॒ ब्रव॑त् ॥ ६ ०५४ ०१
सम् उ॑ पू॒ष्णा ग॑मेमहि॒ यो गृ॒हाꣳ अ॑भि॒शास॑ति ।
इ॒म ए॒वेति॑ च॒ ब्रव॑त् ॥ ६ ०५४ ०२
पू॒ष्णश् च॒क्रं न रि॑ष्यति॒ न कोशो ऽव॑ पद्यते ।
नो अ॑स्य व्यथते प॒विः ॥ ६ ०५४ ०३
यो अ॑स्मै ह॒विषावि॑ध॒न् न तम् पू॒षापि॑ मृष्यते ।
प्र॒थ॒मो वि॑न्दते॒ वसु॑ ॥ ६ ०५४ ०४
पू॒षा गा अन्व् ए॑तु नः पू॒षा र॑क्ष॒त्व् अर्व॑तः ।
पू॒षा वाजं॑ सनोतु नः ॥ ६ ०५४ ०५
पूष॒न्न् अनु॒ प्र गा इ॑हि॒ यज॑मानस्य सु॒न्व॒तः ।
अ॒स्माकं॑ स्तुव॒ताम् उ॒त ॥ ६ ०५४ ०६
माकि॑र् नेश॒न् माकीं॑ रिष॒न् माकीं॒ सं शा॑रि॒ केव॑टे ।
अथारि॑ष्टाभि॒र् आ ग॑हि ॥ ६ ०५४ ०७
शृ॒ण्वन्त॑म् पू॒षणं॑ व॒यम् इ॒र्य॑म् अन॑ष्टवेदसम् ।
ईशा॑नं रा॒य ईं॑महे ॥ ६ ०५४ ०८
पूष॒न् तव॑ व्र॒ते व॒यं न रि॑ष्येम॒ कदा॑ च॒न ।
स्तो॒तार॑स् त इ॒ह स्म॑सि ॥ ६ ०५४ ०९
परि॑ पू॒षा प॒रस्ता॒द् धस्तं॑ दधातु॒ दक्षि॑णम् ।
पुन॑र् नो न॒ष्टम् आज॑तु ॥ ६ ०५४ १०

(४९६)
एहि॒ वां वि॑मुचो नपा॒द् आघृणि॒ सं स॑चावहै ।
र॒थीर् ऋ॒तस्य॑ नो भव ॥ ६ ०५५ ०१
र॒थीत॑मं क॒प॒र्दिन॒म् ईशा॒नं राध॑सो म॒हः ।
रा॒यः सखा॑यम् ईमहे ॥ ६ ०५५ ०२
रा॒यो धारा॑स्य् आघृणे॒ वसो॑ रा॒शिर् अ॑जाश्व ।
धीव॑तो-धीवत॒ः सखा॑ ॥ ६ ०५५ ०३

पूषणं न्व् अ १ जाश्वम् उप स्तोषाम वाजिनम् ।
स्वसुर् यो जार उच्यते ॥ ६ ०५५ ०४
मातुर् दिधिषुम् अब्रवं स्वसुर् जारः शृणोतु नः ।
भ्रातेन्द्रस्य सखा मम ॥ ६ ०५५ ०५
आजासः पूषणं रथे निशृम्भास् ते जनश्रियम् ।
देवं वहन्तु बिभ्रतः ॥ ६ ०५५ ०६

(४९७)
य एनम् आदिदेशति करम्भाद् इति पूषणम् ।
न तेन देव आदिशे ॥ ६ ०५६ ०१
उत घा स रथीतमः सख्या सत्पतिर् युजा ।
इन्द्रो वृत्राणि जिघ्नते ॥ ६ ०५६ ०२
उतादः परुषे गवि सूरश् चक्रं हिरण्ययम् ।
न्य् आइरयद् रथीतमः ॥ ६ ०५६ ०३
यद् अद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः ।
तत् सु नो मन्म साधय ॥ ६ ०५६ ०४
इमं च नो गवेषणं सातये सीषधो गणम् ।
आरात् पूषन्न् असि श्रुतः ॥ ६ ०५६ ०५
आ ते स्वस्तिम् ईमह आरेअघाम् उपावसुम् ।
अद्या च सर्वतातये श्वश् च सर्वतातये ॥ ६ ०५६ ०६

(४९८)
इन्द्रा नु पूषणा वयं सख्याय स्वस्तये ।
हुवेम वाजसातये ॥ ६ ०५७ ०१
सोमम् अन्य उपासदत् पातवे चम्वोः सुतम् ।
करम्भम् अन्य इच्छति ॥ ६ ०५७ ०२

अजा अन्यस्य वह्नयो हरी अन्यस्य सम्भृता ।
ताभ्यां वृत्राणि जिघ्नते ॥ ६ ०५७ ०३
यद् इन्द्रो अनयद् रितो महीर् अपो वृषन्तमः ।
तत्र पूषाभवत् सचा ॥ ६ ०५७ ०४
ताम् पूष्णः सुमतिं वयं वृक्षस्य प्र वयाम् इव ।
इन्द्रस्य चा रभामहे ॥ ६ ०५७ ०५
उत् पूषणं युवामहे ऽभीशूँर् इव सारथिः ।
मह्या इन्द्रं स्वस्तये ॥ ६ ०५७ ०६

(४९९)
शुक्रं ते अन्यद् यजतं ते अन्यद् विषुरूपे अहनी द्यौर् इवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्न् इह रातिर् अस्तु ॥ ६ ०५८ ०१
अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्राम् पूषा शिथिराम् उद्वरीवृजत् संचक्षाणो भुवना देव ईयते ॥ ६ ०५८ ०२
यास् ते पूषन् नावो अन्तः समुद्रे हिरण्ययीर् अन्तरिक्षे चरन्ति ।
ताभिर् यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥ ६ ०५८ ०३
पूषा सुबन्धुर् दिव आ पृथिव्या इळस् पतिर् मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ॥ ६ ०५८ ०४

(५००)
प्र नु वोचा सुतेषु वां वीर्या ३ यानि चक्रथुः ।
हतासो वाम् पितरो देवशत्रव इन्द्राग्नी जीवथो युवम् ॥ ६ ०५९ ०१
बळ् इत्था महिमा वाम् इन्द्राग्नी पनिष्ठ आ ।
समानो वां जनिता भ्रातरा युवं यमाव् इहेहमातरा ॥ ६ ०५९ ०२
ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।
इन्द्रा न्व् अ १ ग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥ ६ ०५९ ०३

य इन्द्राग्नी सुतेषु वां स्तवत् तेष्व् ऋतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश् चन ॥ ६ ०५९ ०४
इन्द्राग्नी को अस्य वां देवौ मर्तश् चिकेतति ।
विषूचो अश्वान् युयुजान ईयत एकः समान आ रथे ॥ ६ ०५९ ०५
इन्द्राग्नी अपाद् इयम् पूर्वागात् पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच् चरत् त्रिंशत् पदा न्य् अक्रमीत् ॥ ६ ०५९ ०६
इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।
मा नो अस्मिन् महाधने परा वर्क्तं गविष्टिषु ॥ ६ ०५९ ०७
इन्द्राग्नी तपन्ति माघा अर्यो अरातयः ।
अप द्वेषांस्य् आ कृतं युयुतं सूर्याद् अधि ॥ ६ ०५९ ०८
इन्द्राग्नी युवोर् अपि वसु दिव्यानि पार्थिवा ।
आ न इह प्र यच्छतं रयिं विश्वायुपोषसम् ॥ ६ ०५९ ०९
इन्द्राग्नी उक्थवाहसा स्तोमेभिर् हवनश्रुता ।
विश्वाभिर् गीर्भिर् आ गतम् अस्य सोमस्य पीतये ॥ ६ ०५९ १०

(५०१)
श्नथद् वृत्रम् उत सनोति वाजम् इन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥ ६ ०६० ०१
ता योधिष्टम् अभि गा इन्द्र नूनम् अपः स्वर् उषसो अग्न ऊळ्हाः ।
दिशः स्वर् उषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥ ६ ०६० ०२
आ वृत्रहणा वृत्रहभिः शुष्मैर् इन्द्र यातं नमोभिर् अग्ने अर्वाक् ।
युवं राधोभिर् अकवेभिर् इन्द्राग्ने अस्मे भवतम् उत्तमेभिः ॥ ६ ०६० ०३
ता हुवे ययोर् इदम् पप्ने विश्वम् पुरा कृतम् ।
इन्द्राग्नी न मर्धतः ॥ ६ ०६० ०४
उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
ता नो मृळात ईदृशे ॥ ६ ०६० ०५
हतो वृत्राण्य् आर्या हतो दासानि सत्पती ।

हतो विश्वा अप द्विषः ॥ ६ ०६० ०६
इन्द्राग्नी युवाम् इमे ऽभि स्तोमा अनूषत ।
पिबतं शम्भुवा सुतम् ॥ ६ ०६० ०७
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
इन्द्राग्नी ताभिर् आ गतम् ॥ ६ ०६० ०८
ताभिर् आ गच्छतं नरोपेदं सवनं सुतम् ।
इन्द्राग्नी सोमपीतये ॥ ६ ०६० ०९
तम् ईळिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।
कृष्णा कृणोति जिह्वया ॥ ६ ०६० १०
य इद्ध आविवासति सुम्नम् इन्द्रस्य मर्त्यः ।
द्युम्नाय सुतरा अपः ॥ ६ ०६० ११
ता नो वाजवतीर् इष आशून् पिपृतम् अर्वतः ।
इन्द्रम् अग्निं च वोळ्हवे ॥ ६ ०६० १२
उभा वाम् इन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारav् इषां रयीणाम् उभा वाजस्य सातये हुवे वाम् ॥ ६ ०६० १३
आ नो गव्येभिर् अश्व्यैर् वसव्याइर् उप गच्छतम् ।
सखायौ देवौ सख्याय शम्भुवेन्द्राग्नी ता हवामहे ॥ ६ ०६० १४
इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः ।
वीतं हव्यान्य् आ गतम् पिबतं सोम्यम् मधु ॥ ६ ०६० १५

(५०२)
इयम् अददाद् रभसम् ऋणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वन्तम् आचखादावसम् पणिं ता ते दात्राणि तविषा सरस्वति ॥ ६ ०६१ ०१
इयं शुष्मेभिर् बिसखा इवारुजत् सानु गिरीणां तविषेभिर् ऊर्मिभिः ।
पारावतघ्नीम् अवसे सुवृक्तिभिः सरस्वतीम् आ विवासेम धीतिभिः ॥ ६ ०६१ ०२
सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।
उत क्षितिभ्यो ऽवनीर् अविन्दो विषम् एभ्यो अस्रवो वाजिनीवति ॥ ६ ०६१ ०३

प्र णो॑ दे॒वी सर॑स्वती॒ वाजे॑भिर् वा॒जिनी॑वती ।
धी॒नाम् अ॑वि॒त्र्य् अवतु ॥ ६ ०६१ ०४
यस् त्वा॑ देवि सरस्वत्य् उपब्रू॒ते धने॑ हि॒ते ।
इन्द्रं॒ न वृ॑त्र॒तूर्ये॑ ॥ ६ ०६१ ०५
त्वं दे॑वि सरस्व॒त्य् अवा॒ वाजे॑षु वाजिनि ।
रदा॑ पू॒षेव॑ नः स॒निम् ॥ ६ ०६१ ०६
उ॒त स्या नः॒ सर॑स्वती घो॒रा हिर॑ण्यवर्तनिः ।
वृ॒त्र॒घ्नी व॑ष्टि सुष्टु॒तिम् ॥ ६ ०६१ ०७
यस्या॑ अ॒नन्तो॒ अह्रु॑तस् त्वे॒षश् च॑रि॒ष्णुर् अ॑र्ण॒वः ।
अ॒मश् चर॑ति॒ रोरु॑वत् ॥ ६ ०६१ ०८
सा नो॒ विश्वा॒ अति॒ द्विषः॒ स्वसॄ॑र् अ॒न्या ऋ॒ताव॑री ।
अत॒न्न् अहे॑व॒ सूर्यः॑ ॥ ६ ०६१ ०९
उ॒त नः॑ प्रि॒या प्रि॒यासु॑ स॒प्तस्व॑सा॒ सुजु॑ष्टा ।
सर॑स्वती॒ स्तोम्या॑ भूत् ॥ ६ ०६१ १०
आ॒प॒प्रुषी॒ पार्थि॑वान्य् उ॒रु रजो॑ अ॒न्तरि॑क्षम् ।
सर॑स्वती नि॒दस् पा॑तु ॥ ६ ०६१ ११
त्रि॒ष॒धस्था॑ स॒प्तधा॑तुः॒ पञ्च॑ जा॒ता व॒र्धय॑न्ती ।
वाजे॑-वाजे॒ हव्या॑ भूत् ॥ ६ ०६१ १२
प्र या म॑हि॒म्ना म॒हिना॑सु॒ चेकि॑ते द्यु॒म्नेभि॑र् अ॒न्या अ॒पसा॑म् अ॒पस्त॑मा ।
रथ॑ इव बृह॒ती वि॒भ्वने॑ कृ॒तोप॒स्तुत्या॑ चिकि॒तुषा॒ सर॑स्वती ॥ ६ ०६१ १३
सर॑स्वत्य् अ॒भि नो॑ नेषि॒ वस्यो॒ माप॑ स्फरीः॒ पय॑सा॒ मा न॒ आ ध॑क् ।
जु॒षस्व॑ नः स॒ख्या वे॒श्या॑ च॒ मा त्वत् क्षेत्रा॒ण्य् अर॑णानि गन्म ॥ ६ ०६१ १४

(५०३)
स्तु॒षे नरा॑ दि॒वो अ॒स्य प्र॒सन्ता॒श्विना॑ हुवे॒ जर॑माणो अ॒र्कैः ।
या स॒द्य उ॒स्रा व्युषि॒ ज्मो अन्ता॒न् युयू॑षतः॒ पर्य् उ॒रू वरां॑सि ॥ ६ ०६२ ०१
ता य॒ज्ञम् आ शुचि॑भिश् चक्रमा॒णा रथ॑स्य भा॒नुं रु॑रुचू॒ रजो॑भिः ।

पुरू वरांस्य् अमिता मिमानापो धन्वान्य् अति याथो अज्रान् ॥ ६ ०६२ ०२
ता ह त्यद् वर्तिर् यद् अरध्रम् उग्रेत्था धिय ऊहथुः शश्वद् अश्वैः ।
मनोजवेभिर् इषिरैः शयध्यै परि व्यथिर् दाशुषो मर्त्यस्य ॥ ६ ०६२ ०३
ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।
शुभम् पृक्षम् इषम् ऊर्जं वहन्ता होता यक्षत् प्रत्नो अध्रुग् युवाना ॥ ६ ०६२ ०४
ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।
या शंसते स्तुवते शम्भविष्ठा बभूवतुर् गृणते चित्रराती ॥ ६ ०६२ ०५
ता भुज्युं विभिर् अद्भ्यः समुद्रात् तुग्रस्य सूनुम् ऊहथू रजोभिः ।
अरेणुभिर् योजनेभिर् भुजन्ता पतत्रिभिर् अर्णसो निर् उपस्थात् ॥ ६ ०६२ ०६
वि जयुषा रथ्या यातम् अद्रिं श्रुतं हवं वृषणा वध्रिमत्याः ।
दशस्यन्ता शयवे पिप्यथुर् गाम् इति च्यवाना सुमतिम् भुरण्यू ॥ ६ ०६२ ०७
यद् रोदसी प्रदिवो अस्ति भूमा हेळो देवानाम् उत मर्त्यत्रा ।
तद् आदित्या वसवो रुद्रियासो रक्षोयुजे तपुर् अघं दधात ॥ ६ ०६२ ०८
य ई राजानाव् ऋतुथा विदधद् रजसो मित्रो वरुणश् चिकेतत् ।
गम्भीराय रक्षसे हेतिम् अस्य द्रोघाय चिद् वचस आनवाय ॥ ६ ०६२ ०९
अन्तरैश् चक्रैस् तनयाय वर्तिर् द्युमता यातं नृवता रथेन ।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यताम् अपि शीर्षा ववृक्तम् ॥ ६ ०६२ १०
आ परमाभिर् उत मध्यमाभिर् नियुद्भिर् यातम् अवमाभिर् अर्वाक् ।
दृळ्हस्य चिद् गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥ ६ ०६२ ११

(५०४)
क्व१ त्या वल्गू पुरुहूताद्य दूतो न स्तोमो ऽविदन् नमस्वान् ।
आ यो अर्वाङ् नासत्या ववर्त प्रेष्ठा ह्य असथो अस्य मन्मन् ॥ ६ ०६३ ०१
अरम् मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः ।
परि ह त्यद् वर्तिर् याथो रिषो न यत् परो नान्तरस् तुतुर्यात् ॥ ६ ०६३ ०२
अकारि वाम् अन्धसो वरीमन्न् अस्तारि बर्हिः सुप्रायणतमम् ।
उत्तानहस्तो युवयुर् ववन्दा वां नक्षन्तो अद्रय आञ्जन् ॥ ६ ०६३ ०३

ऊर्ध्वो वाम् अग्निर् अध्वरेष्व् अस्थात् प्र रातिर् एति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणो ऽयुक्त यो नासत्या हवीमन् ॥ ६ ०६३ ०४
अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।
प्र मायाभिर् मायिना भूतम् अत्र नरा नृतू जनिमन् यज्ञियानाम् ॥ ६ ०६३ ०५
युवं श्रीभिर् दर्शताभिर् आभिः शुभे पुष्टिम् ऊहथुः सूर्यायाः ।
प्र वां वयो वपुषे ऽनु पप्तन् नक्षद् वाणी सुष्टुता धिष्ण्या वाम् ॥ ६ ०६३ ०६
आ वां वयो ऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु ।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥ ६ ०६३ ०७
पुरु हि वाम् पुरुभुजा देष्णं धेनुं न इषम् पिन्वतम् असक्राम् ।
स्तुतश् च वाम् माध्वी सुष्टुतिश् च रसाश् च ये वाम् अनु रातिम् अग्मन् ॥ ६ ०६३ ०८
उत म ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतम् पेरुके च पक्वा ।
शाण्डो दाद् धिरणिनः स्मद्दिष्टीन् दश वशासो अभिषाच ऋष्वान् ॥ ६ ०६३ ०९
सं वां शता नासत्या सहस्राश्वानाम् पुरुपन्था गिरे दात् ।
भरद्वाजाय वीर नू गिरे दाद् धता रक्षांसि पुरुदंससा स्युः ॥ ६ ०६३ १०
आ वां सुम्ने वरिमन् सूरिभिः ष्याम् ॥ ६ ०६३ ११

(५०५)
उद् उ श्रिय उषसो रोचमाना अस्थुर् अपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्य् अभूद् उ वस्वी दक्षिणा मघोनी ॥ ६ ०६४ ०१
भद्रा ददृक्ष उर्विया वि भास्य् उत ते शोचिर् भानवो द्याम् अपप्तन् ।
आविर् वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ॥ ६ ०६४ ०२
वहन्ति सीम् अरुणासो रुशन्तो गावः सुभगाम् उर्विया प्रथानाम् ।
अपेजते शूरो अस्तेव शत्रून् बाधते तमो अजिरो न वोळ्हा ॥ ६ ०६४ ०३
सुगोत ते सुपथा पर्वतेष्व् अवाते अपस् तरसि स्वभानो ।
सा न आ वह पृथुयामन्न् ऋष्वे रयिं दिवो दुहितर् इषयध्यै ॥ ६ ०६४ ०४
सा वह योक्षभिर् अवातोषो वरं वहसि जोषम् अनु ।

त्वं दिवो दुहितर् या ह देवी पूर्वहूतौ मंहना दर्शता भूः ॥ ६ ०६४ ०५
उत् ते वयश् चिद् वसतेर् अपप्तन् नरश् च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वामम् उषो देवि दाशुषे मर्त्याय ॥ ६ ०६४ ०६

(५०६)
एषा स्या नो दुहिता दिवोजाः क्षितीर् उच्छन्ती मानुषीर् अजीगः ।
या भानुना रुशता राम्यास्व् अज्ञायि तिरस् तमसश् चिद् अक्तून् ॥ ६ ०६५ ०१
वि तद् ययुर् अरुणयुग्भिर् अश्वैश् चित्रम् भान्त्य् उषसश् चन्द्ररथाः ।
अग्रं यज्ञस्य बृहतो नयन्तीर् वि ता बाधन्ते तम ऊर्म्यायाः ॥ ६ ०६५ ०२
श्रवो वाजम् इषम् ऊर्जं वहन्तीर् नि दाशुष उषसो मर्त्याय ।
मघोनीर् वीरवत् पत्यमाना अवो धात विधते रत्नम् अद्य ॥ ६ ०६५ ०३
इदा हि वो विधते रत्नम् अस्तीदा वीराय दाशुष उषासः ।
इदा विप्राय जरते यद् उक्था नि ष्म मावते वहथा पुरा चित् ॥ ६ ०६५ ०४
इदा हि त उषो अद्रिसानो गोत्रा गवाम् अङ्गिरसो गृणन्ति ।
व्य् अ१र्केण बिभिदुर् ब्रह्मणा च सत्या नृणाम् अभवद् देवहूतिः ॥ ६ ०६५ ०५
उच्छा दिवो दुहितः प्रत्नवन् नो भरद्वाजवद् विधते मघोनि ।
सुवीरं रयिं गृणते रिरीह्य उरुगायम् अधि धेहि श्रवो नः ॥ ६ ०६५ ०६

(५०७)
वपुर् नु तच् चिकितुषे चिद् अस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्व् अन्यद् दोहसे पीपाय सकृच् छुक्रं दुदुहे पृश्निर् ऊधः ॥ ६ ०६६ ०१
ये अग्नयो न शोशुचन्न् इधाना द्विर् यत् त्रिर् मरुतो वावृधन्त ।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश् च भूवन् ॥ ६ ०६६ ०२
रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा यांश् चो नु दाधृविर् भरध्यै ।
विदे हि माता महो मही षा सेत् पृश्निः सुभ्वे३ गर्भम् आधात् ॥ ६ ०६६ ०३
न य ईषन्ते जनुषो ऽया न्व् अ१न्तः सन्तो ऽवद्यानि पुनानाः ।

निर् यद् दुह्रे शुचयो ऽनु जोषम् अनु श्रिया तन्वम् उक्षमाणाः ॥ ६ ०६६ ०४
मक्षू न येषु दोहसे चिद् अया आ नाम धृष्णु मारुतं दधानाः ।
न ये स्तौना अयासो मह्ना नू चित् सुदानुर् अव यासद् उग्रान् ॥ ६ ०६६ ०५
त इद् उग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके ।
अध स्मैषु रोदसी स्वशोचिर् आमवत्सु तस्थौ न रोकः ॥ ६ ०६६ ०६
अनेनो वो मरुतो यामो अस्त्व् अनश्वश् चिद् यम् अजत्य् अरथीः ।
अनवसो अनभीशू रजस्तूर् वि रोदसी पथ्या याति साधन् ॥ ६ ०६६ ०७
नास्य वर्ता न तरुता न्व् अस्ति मरुतो यम् अवथ वाजसातौ ।
तोके वा गोषु तनये यम् अप्सु स व्रजं दर्ता पार्ये अध द्योः ॥ ६ ०६६ ०८
प्र चित्रम् अर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥ ६ ०६६ ०९
त्विषीमन्तो अध्वरस्येव दिद्युत् तृषुच्यवसो जुह्वो ३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥ ६ ०६६ १०
तं वृधन्तम् मारुतम् भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥ ६ ०६६ ११

(५०८)
विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर् मित्रावरुणा वावृधध्यै ।
सं या रश्मेव यमतुर् यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥ ६ ०६७ ०१
इयम् मद् वाम् प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिर् अच्छ ।
यन्तं नो मित्रावरुणाव् अधृष्टं छर्दिर् यद् वां वरूथ्यं सुदानू ॥ ६ ०६७ ०२
आ यातम् मित्रावरुणा सुशस्त्य् उप प्रिया नमसा हूयमाना ।
सं याव् अप्नःस्थो अपसेव जनाञ् छ्रुधीयतश् चिद् यतथो महित्वा ॥ ६ ०६७ ०३
अश्वा न या वाजिना पूतबन्धू ऋता यद् गर्भम् अदितिर् भरध्यै ।
प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः ॥ ६ ०६७ ०४
विश्वे यद् वाम् मंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।
परि यद् भूथो रोदसी चिद् उर्वी सन्ति स्पशो अदब्धासो अमूराः ॥ ६ ०६७ ०५

ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुम् उपमाद् इव द्योः ।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिम् आतान् द्यां धासिनायोः ॥ ६ ०६७ ०६
ता विग्रं धैथे जठरम् पृणध्या आ यत् सद्म सभृतयः पृणन्ति ।
न मृष्यन्ते युवतयो ऽवाता वि यत् पयो विश्वजिन्वा भरन्ते ॥ ६ ०६७ ०७
ता जिह्वया सदम् एदं सुमेधा आ यद् वां सत्यो अरतिर् ऋते भूत् ।
तद् वाम् महित्वं घृतान्नाव् अस्तु युवं दाशुषे वि चयिष्टम् अंहः ॥ ६ ०६७ ०८
प्र यद् वाम् मित्रावरुणा स्पूर्धन् प्रिया धाम युवधिता मिनन्ति ।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥ ६ ०६७ ०९
वि यद् वाचं कीस्तासो भरन्ते शंसन्ति के चिन् निविदो मनानाः ।
आद् वाम् ब्रवाम सत्यान्य् उक्था नकिर् देवेभिर् यतथो महित्वा ॥ ६ ०६७ १०
अवोर् इत्था वां छर्दिषो अभिष्टौ युवोर् मित्रावरुणाव् अस्कृधोयु ।
अनु यद् गाव स्फुरान् ऋजिप्यं धृष्णुं यद् रणे वृषणं युनजन् ॥ ६ ०६७ ११

(५०९)
श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद् वृक्तबर्हिषो यजध्यै ।
आ य इन्द्रावरुणाव् इषे अद्य महे सुम्नाय मह आववर्तत् ॥ ६ ०६८ ०१
ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।
मघोनाम् मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना ॥ ६ ०६८ ०२
ता गृणीहि नमस्येभिः शूषैः सुम्नेभिर् इन्द्रावरुणा चकाना ।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्य् अन्यो वृजनेषु विप्रः ॥ ६ ०६८ ०३
ग्नाश् च यन् नरश् च वावृधन्त विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इन्द्रावरुणा महित्वा द्यौश् च पृथिवि भूतम् उर्वी ॥ ६ ०६८ ०४
स इत् सुदानुः स्ववाꣳ ऋतावेन्द्रा यो वां वरुण दाशति त्मन् ।
इषा स द्विषस् तरेद् दास्वान् वंसद् रयिं रयिवतश् च जनान् ॥ ६ ०६८ ०५
यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तम् पुरुक्षुम् ।
अस्मे स इन्द्रावरुणाव् अपि ष्यात् प्र यो भनक्ति वनुषाम् अशस्तीः ॥ ६ ०६८ ०६
उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात् ।

येषां शुष्मः पृतनासु साह्वान् प्र सद्यो द्युम्ना तिरते ततुरिः ॥ ६ ०६८ ०७
नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।
इत्था गृणन्तो महिनस्य शर्धो ऽपो न नावा दुरिता तरेम ॥ ६ ०६८ ०८
प्र सम्राजे बृहते मन्म नु प्रियम् अर्च देवाय वरुणाय सप्रथः ।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्य् अजरो न शोचिषा ॥ ६ ०६८ ०९
इन्द्रावरुणा सुतपाव् इमं सुतं सोमम् पिबतम् मद्यं धृतव्रता ।
युवो रथो अध्वरं देववीतये प्रति स्वसरम् उप याति पीतये ॥ ६ ०६८ १०
इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वाम् अन्धः परिषिक्तम् अस्मे आसद्यास्मिन् बर्हिषि मादयेथाम् ॥ ६ ०६८ ११

(५७०)
सं वां कर्मणा सम् इषा हिनोमीन्द्राविष्णू अपसस् पारे अस्य ।
जुषेथां यज्ञं द्रविणं च धत्तम् अरिष्टैर् नः पथिभिः पारयन्ता ॥ ६ ०६९ ०१
या विश्वासां जनितारा मतीनाम् इन्द्राविष्णू कलशा सोमधाना ।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः ॥ ६ ०६९ ०२
इन्द्राविष्णू मदपती मदानाम् आ सोमं यातं द्रविणो दधाना ।
सं वाम् अञ्जन्त्व् अक्तुभिर् मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥ ६ ०६९ ०३
आ वाम् अश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।
जुषेथां विश्वा हवना मतीनाम् उप ब्रह्माणि शृणुतं गिरो मे ॥ ६ ०६९ ०४
इन्द्राविष्णू तत् पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतम् अन्तरिक्षं वरीयो ऽप्रथतं जीवसे नो रजांसि ॥ ६ ०६९ ०५
इन्द्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या ।
घृतासुती द्रविणं धत्तम् अस्मे समुद्र स्थः कलशः सोमधानः ॥ ६ ०६९ ०६
इन्द्राविष्णू पिबतम् मध्वो अस्य सोमस्य दस्रा जठरम् पृणेथाम् ।
आ वाम् अन्धांसि मदिराण्य् अग्मन्न् उप ब्रह्माणि शृणुतं हवम् मे ॥ ६ ०६९ ०७
उभा जिग्यथुर् न परा जयेथे न परा जिग्ये कतरश् चनैनोः ।
इन्द्रश् च विष्णो यद् अपस्पृधेथां त्रेधा सहस्रं वि त् ॥ ६ ०६९ ०८